पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीजयरामन्यायपञ्चाननविरचितः

कारकवादः

सम्पादकः

डा. श्रीनिवास वरखेडि

शाब्दबोधविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

प्रकाशनम्

पूर्णप्रज्ञसंशोधनमन्दिरम्

पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८

२००७

श्रीजयरामन्यायपञ्चाननविरचितः

कारकवादः

ग्रन्थसंशोधनं सम्पादनञ्च

डा. श्रीनिवासः वरखेडी

संशोधनसाहाय्यम्

कु. शिवजा

प्रकाशनम्

पूर्णप्रज्ञसंशोधनमन्दिरम्

बेंगळूरु ५६० ०२८.

KAARAKAVADA

of

Jayarama Nyaya Panchanana

Editor

Dr. Srinivasa Varakhedi

Editorial Assistance

Miss. Sivaja

Publisher

Poorna Prajna Samshodhana Mandiram

Bangalore - 560 028

आशीर्वचनम्

महदिदं प्रमोदस्थानं यत् अस्मत्प्रियशिष्येण श्रीमता वरखेडी-श्रीनिवासेन जयरामन्यायपंचाननविरचितः कारकवादाख्यः ग्रन्थः महता श्रमेण मातृकाभ्यः सम्पाद्य प्राकाश्यं नीयत इति। अयं च ग्रन्थः न्यायशास्त्ररीत्या कारकतत्वनिरूपणपरः विदुषां तोषमातनोतीति विश्वसिमो वयम्।

प्रकाशनमिदम् अस्माकं पूर्णप्रज्ञसंशोधनमन्दिरद्वारा क्रियत इति मन्दिरस्य अधिकारिणः विशेषतः अभिनन्द्य, एवमेवैतादृशानाम् अपूर्वग्रन्थानां प्रकाशनंकार्यं संशोधनालयेन स्वीक्रियतामिति आशास्महे।।

इति
श्रीनारायणस्मृतयः

श्री १००८ श्री विश्वेशतीर्थश्रीपादाः
पेजावर-अधोक्षजमठः, उडुपि

Poornaprajna Samshodhana Mandiram Publication No.45

Kaarakavaada of Sri Jayarama Nyayapanchanana

Edited by ***Dr. Shrinivasa Varakhedi***

First Edition : 2007

Copies : 500

Copies can be had at

The Director
Poornaprajna Samshodhana Mandiram
Poornaprajna Vidyapeetha
Bangalore - 560 028
ppsmb@gmail.com

Price **Rs. 20=00**

Printed at VAGARTHA,
149, 8th Cross, N.R. Colony
Bangalore - 560 019. Ph. : 2242 7677

Director's Note

We are happy to present Karakavada of Sri Jayarama Nyaya Panchanana. He was a pupil of Sri Rama Bhadra Sarvabhouma of 17^{th} Century, from Navadveepa, who had made name and fame. The six stages form six Karakas, namely Karthru, Karma, Karana, Sampradana, Apadana and Adhikarana. The Characteristic aspects and their revised amendments have been discussed in detail in a highly attractive style.

It will be a big feast indeed to those who have attained proficiency in Tarka Shastra and Vyakarana. We happily record that this work is edited by Dr. Srinivasa Varakhedi – winner of Badarayana Prashasti by the President of Indian Republic.

Dr. Srinivasa Varakhedi has conducted a research on this work and has consulted many manuscripts to give the most useful references in the foot-notes.

We look forward to his continued research on many subjects to contribute to the world of philosophy and Sanskrit. We wish him the best future.

Dr. A.V. Nagasampige
Director

पुरोवाक्

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।

यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।

अखिलमपि जीवजातं शब्द प्रमाणमाश्रित्यैव स्वाशयान् प्रकटयितुं प्रभवति। अतः न केवलं सामान्यलोकैः, अपि तु शास्त्रज्ञैरपि शब्दप्रमाणम् जिज्ञासितमेव। शब्दस्वरूपचिन्ता केवलं वैयाकरणानां, तदर्थचिन्ता तु न्यायव्याकरणमीमांसकादीनां सर्वेषामपि।

शब्दाज्जायमानः बोधः शाब्दबोधः। बोधो नाम ज्ञानम्। 'बुध अवगमने' इति धातोः निष्पन्नोऽयं शब्दः ज्ञानार्थकः। शब्दस्यायं शाब्द इति व्युत्पत्या शब्दसम्बन्धी बोधः शाब्दबोधपदेन उच्यते। अत्र शब्द इत्यनेन वाक्यं विवक्षितम्। वाक्यं तु परस्परान्वितार्थप्रतिपादकपदसमूहः। इत्थं शब्दात् = वाक्यात्, जायमानः बोधः वाक्यार्थज्ञानम् इत्युच्यते। तदेव शाब्दबोधः इत्यपि उच्यते। उदाहरणम् - 'सीता पठती'ति वाक्यात् सीताकर्तृकपठनक्रियायाः बोधो जायते। अयं बोधः एव वाक्यार्थबोधः अथवा शाब्दबोध इत्युच्यते। इत्थञ्च शब्दो न वर्णः, न ध्वनिः, न वा पदम्, नापि अनन्वितपदानि, अपि तु वाक्यमिति ज्ञेयम्। शब्दोऽत्र प्रमाणशब्देन विवक्षितः। कः प्रमाणशब्दः ? आप्तवाक्यम्। आप्तोक्तं वाक्यमित्यर्थः। तथा च सामान्यतो वाक्यं शब्द इत्युच्यते। एवं शाब्दबोधः कथं जायते ? को वा विषयः ? कानि वा साधनानि ? इत्यादिकमेव शाब्दबोध-ग्रन्थेषु विचारितं वर्तते। तत्र पदज्ञानं करणम्। वृत्या पदजन्यपदार्थस्मृतिः

व्यापारः। तत्र वृत्तिः नाम पदपदार्थयोः शक्तिलक्षणान्यतररूपः सम्बन्धः। पदेषु ज्ञातेषु एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति विधया पदार्थस्मरणं जायते। स्मृतानां पदार्थानां मिथोऽन्वयः आकाङ्क्षादिवशात् बोध्यते। शब्दात् वाक्यार्थज्ञानसम्पत्तौ आकाङ्क्षाज्ञानं व्युत्पत्त्यपरनामकं कारणमिति विचारः शाब्दबोधग्रन्थेषु महान् दृश्यते। शाब्दबोधे पदार्थानां मिथः सम्बन्धेन विभक्त्यर्थद्वारा अन्वीयमानाः अर्थाः कारकाणि इत्युच्यन्ते। स एवात्र ग्रन्थे प्रतिपाद्यो विषयः।

<u>कारकवादः</u>

'कारकवादः' षट्कारकाणि अधिकृत्य विच्छेदषट्केन विभक्तः अल्पो ग्रन्थः। तत्रादौ कारकसामान्यलक्षणं, ततश्च कर्त्रादिषट्कारकार्थाः निरूपिताः। न केवलं लक्षणकरणं, कृतस्य लक्षणस्य कृत्यचिन्तनम्; अपि तु उदाहरणप्रत्युदाहरणभूतानां लोकव्यवहाराणां शाब्दबोध-विवेचनमपि ग्रन्थेऽस्मिन् कृतमिति ग्रन्थस्यास्य वैशिष्ट्यम्। गदाधर-जगदीश-प्रदर्शितं पन्थानमेवाश्रित्य अतिनूतनाः विषयाः स्वीयया प्रतिभया ग्रन्थकारेण समाविष्कृता इति विशेषः।

<u>कारकतत्त्वम्</u>

वाक्ये पदसमूहरूपे, सुबन्तानि बहुलमुपयुज्यन्ते। सुब्विभक्तिः प्रथमादिभेदेन सप्तविधा। सा पुनः कारकार्था तदितरार्था चेति द्विविधा। तत्र कारकं षड्विधम् - अपादान-सम्प्रदान-करण-अधिकरण-कर्म-कर्तृभेदात्। अयं च क्रमः अष्टाध्याय्यां समादृतः। ततश्च अयमेवक्रमः पाणिनीयैः वैय्याकरणैः

स्वीकृतः। कालान्तरे च विभक्त्यर्थविचारावसरे प्रथमादि विभक्तिक्रममनुसृत्य कारकार्थविचारोऽपि आरब्धः इति कर्तृकर्मकरणसम्प्रदानापादानाधिकरणभेदात् षण्णां कारकाणां नूतनः क्रमः अर्थविचारपरकेषु ग्रन्थेषु दरीदृश्यते। अयं च क्रमः आधुनिकः। प्रकृतेऽपि ग्रन्थे अयमेवक्रमः ग्रन्थकर्त्रा स्वीकृतः। शाब्दबोधवर्णनकाले नामार्थानां क्रियायाम् अन्वयः प्रतिपादनीयः। स चान्वयः कारकान्वय इति नानार्थान्तरम्।।

कारकाणां विषये न्यायव्याकरणादिग्रन्थेषु अर्थविचारपरकेषु सर्वत्र विमर्शः दृश्यते। तत्र प्रसिद्ध्यन्ति नागेशकृता मञ्जूषा, कौण्डभट्टकृतः भूषणसारः, पदवाक्यरत्नाकरः इति वैय्याकरणानां ग्रन्थाः। गदाधरभट्टाचार्यविरचितः व्युत्पत्तिवादः, जगदीशतर्कालङ्कारकृता शब्दशक्तिप्रकाशिका, गिरिधरोपाध्यायकृतः विभक्यर्थनिर्णयः, भवानन्दकृतं षट्कारकविवेचनं, जयरामकृतः कारकवादः इति मे नैय्यायिकानां ग्रन्थाः। भाट्टरहस्यं, भाट्टकौस्तुभः इत्यादयो ग्रन्थाः मीमांसकानाम्। तदेव विभक्त्यर्थविचरे कारकतत्वं प्राधान्यमश्नुते।।

कारकलक्षणम्

अष्टाध्याय्यां 'कारके' इत्यधिकृत्य कारकाणि निरूपितानि। तत्र नोक्तं कारकलक्षणम्। क्रियानिमित्तत्वं कारकलक्षणमिति तु न सम्यक्। सम्प्रदानादीनां क्रियाया अनिष्पादकत्वात्। तस्मात् क्रियान्वयित्वं, क्रियाजनकत्वयोग्यताबुद्धिविषयत्वं, कर्त्राद्यन्यतमत्वं इत्यादिरूपेण

कारकसामान्यलक्षणम् निरूप्यते। न्यायवार्तिककारेण कारकशब्दो हि प्रवर्तमानः क्रियासाधने क्रियाविशेषयुक्ते प्रवर्तते इत्युक्तम्।

तत्र सर्वप्रथमं कारकं कर्तृत्वम्। कर्तृत्वं च स्वतन्त्रः कर्ता इत्यनुशासनेन स्वातन्त्र्यरूपम् निरुक्तम्। स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वम् इति वैय्याकरणाः, कृतिमत्वमिति नैय्यायिकाः। कारकवादे च तत्तत्क्रियानुकूलकृतिमत्वं तत्तत्क्रियाकर्तृत्वमिति ग्रन्थकर्त्रा निरूपितम्। कर्मत्वं पुनः धात्वर्थतावच्छेदकफलशालित्वम्। अष्टाध्याय्यां 'कर्तुरीप्सिततमं कर्म' इत्यादिना अनुशासनेन विहिता कर्मसंज्ञा नैकेषु अर्थेषु। तेषां एकेन लक्षणेन सङ्ग्रहः ग्रन्थकर्त्रा सम्पादितः। करणत्वं कारकान्तरेणाचरितार्थत्वे सति क्रियाहेतुत्वम्। साधकतमं करणमित्यनुशासनेन विहितमष्टाध्याय्याम्। सम्प्रदानविधायकं पाणिनिसूत्रे कर्मणा यमभिप्रैति स सम्प्रदानमिति, क्रियाकर्मफलभागित्वेन यदुद्देश्यं तत्सम्प्रदानम् इति सम्प्रदानत्वं लक्षितम्। एवं अपादानत्वं नाम परकीयक्रिया-जन्यविभागाश्रयत्वम्। अधिकरणमिति प्रतीतसाक्षिकम् अधिकरणत्वं स्वरूपसम्बन्धविशेषः इति कारकवादे निरूपितम्। तदेवं कारकलक्षणानि निरूप्य ग्रन्थकर्त्रा तद्दलकृत्यचिन्तापूर्वकं लक्ष्यभूतेषु व्यवहारेषु समन्वयः प्रदर्शितः। ग्रन्थस्यास्य दुरवधारणेषु स्थलेषु टिप्पणलेखनपूर्वकं अध्ययनमपि मया ग्रन्थान्ते स्थापितम्।

ग्रन्थकर्ता जयरामन्यायपञ्चाननभट्टाचार्यः[1]

कारकवादप्रणेता जयरामः न्यायशास्त्रपण्डितः 'न्यायपञ्चाननः' इति, 'भट्टाचार्यः' इति च प्रथितः। अयं अभिजनो वा ? कदा कुत्र कस्मिन् देशे वा

---

[1] 'पदार्थमालायाः वैज्ञानिकं सम्पादनम्' इति आचार्य के. ई. गोविन्दन् महाशयानां प्रबन्धादुद्धृतम्।

जनिमलभत ? का वा परम्परा ? कौ वा पितरौ ? के वा भ्रातरः ? कति कालं वा गैर्वाण्यः सेवां अकर्षित् ? के वा शिष्याः ? कदा वा लोकान्तरं प्रविशत् ? इत्यादिषु विषयेषु अन्येषामिव किमपि प्रमाणं नोपलभ्यते ।

देशनिर्णयः

जयरामोऽयं वङ्गदेशीयः इति अनुमातुं शक्यते अस्माभिः तस्य नाम्नैव, यतः पञ्चाननः, भट्टाचार्यः, सार्वभौमः इत्यादयः उपाधयः वङ्गदेशीयानामसाधारणाः। वङ्गदेशान्तर्गतनाडियास्थ'कृष्णागर' इति स्थलस्य राज्ञः रामकृष्णाख्यस्य सभायां जयरामभट्टाचार्यः आस्थानपण्डितः आसीदित्यतः अयं वङ्गीय इति उहयितुं शक्यते।

कालनिर्णयः

न्यायपञ्चाननोऽयं स्वयं रामभद्रशिष्य इति स्वकृतौ तत्वचिन्तामणि-दीधिति-व्याख्या-गूढार्थविद्योतने प्ररम्भे एव प्रमाणयति।

श्रीविश्वेशमशेषमङ्गलभवं भूयोऽभिवाञ्चादरात्
मूर्ध्न्याधाय च रामभद्रचरणद्वन्द्वारविन्दद्वयम् ।
गूढाख्यानधनावृता न विषयप्रोद्बोधिनी दीधितिः
तस्मात् श्रीजयराम एष तनुते गूढार्थविद्योतनम् ।। इति।

तत्रापि रामभद्रनाम्ना प्रथितौ द्वौ विद्वांसौ न्यायशास्त्रवाङ्मये प्रसिद्धौ । तत्रैकः न्यायरहस्याद्यनेक ग्रन्थानां रचयिता जगदीशभट्टाचार्यस्य गुरुः 'सार्वभौमः' इत्युपाध्या समलङ्कृतः एकः। एवं जगदीशभट्टाचार्यस्यैव पौत्रः

शब्दशक्तिप्रकाशिकेत्यादिग्रन्थानां व्यख्याता 'सिद्धान्तवागीशः' इत्युपादिना समलङ्कृतः अपरः च । अनयोः मध्ये कः जयरामन्यायपञ्चाननस्य गुरुः इति प्रश्नस्य समाधानं तु न लभ्यते।

गोपीनाथकविराजः -१६५७ क्रिस्तब्धे वारणसेयपण्डितैः प्रकल्पिते कस्मिंश्चित् व्यवस्थापने जयरामस्य हस्ताक्षराणि साक्ष्यत्वेन दृष्टानि तत् प्रमाणीकृत्य १६५७ क्रिस्तब्धे एव तस्य जीवनकालः इति निश्चित्य सप्तदशशताब्धस्य उत्तरार्धे वर्तमानस्य जयरामन्यायपञ्चानन-भट्टाचार्यस्य गुरुः जगदीशपौत्रः रामभद्रसिद्धान्तवागीश एव भवितुं अर्हति, न तु षोडशशताब्धस्य चरमपादे स्थितस्य जगदीशस्य गुरुः रामभद्रसार्वभौमः इति कालं सिद्धान्तयति।

न्यायसिद्धान्तमालायाः रचनावसरे काश्यां जयरामः न्यवसदिति सतीशचन्द्रविद्याभूषणः तत्रत्यं श्लोकमेव स्वीकृत्य प्रदर्शयति।

सन्न्यायप्रतिपादिता प्रतिपदं सद्युक्तिमुक्तान्विता
दुक्तकोद्धतवारि दर्पशमनी विज्ञैकवेद्याशया।
निर्वाणाध्वविवेचिका सुमनसामन्तस्तमोनाशिनी
श्रीविश्वेशपदाम्बुजप्रणयिनी सिद्धान्तमालाऽस्तु ते।।

अतः जयरामन्यायपञ्चाननस्य कालः सप्तदशशताब्दः एव आसीदिति अनुमातुं शक्यते अस्माभिः।

<u>तदीयाः अन्ये ग्रन्थाः</u>

न्यायशास्त्रमर्मज्ञः शास्त्रान्तरपण्डितः अयं जयरामः अभिमततत्वप्रतिपादकान् ग्रन्थान् बहून् व्यरचयत्। न्यू केटलागस् काटलागोरम् इत्यस्मात् सूचीपुस्तकात् प्राप्ता ग्रन्थानां सूचिका एवं भवति -

१) अनुमानजयरामी २) अन्यथाख्यातिवादः ३) आकाङ्क्षावादः ४) आख्यातवादः ५) आख्यातवादव्याख्या ६) उद्देश्यविधेयबोधस्थलीयविचारः ७) उपाधिवादटीका ८) काव्यप्रकाशव्याख्या तिलकः ९) पदार्थमाला १०) गुणदीधितिविवृत्तिः ११) गूढार्थविद्योतनम् १२) जयरामीयम् १३) जातिपक्षतावादः १४) तत्वचिन्तामण्यालोकविवेकः १५) नञ्वादटीका १६) न्यायकुसुमाञ्जलि-कारिकाव्याख्या १७) न्यायसिद्धान्तमाला १८) पक्षतावादः १९) पदार्थखण्डनव्याख्या २०) प्रतियोगितावादः २१) ब्राह्मणत्ववादार्थः २२) विशिष्टवैशिष्ट्यवादः २३) विषयतावादः २४) व्याप्तिवादटीका २५) व्युत्पत्तिवादटिप्पणी २६) शब्दालोकरहस्यम् २७) सन्निकर्षतत्वविवेकः २८) सन्निकर्षवादः २९) लघुसन्निकर्षवादः ३०) समासतत्वम् ३१) समासवादः ३२) सामग्रीवादः ३३) एवत्वनिरूपणम् ३४) न्यायसिद्धान्तमाला ३५) न्यायकुसुमाञ्जलिव्याख्या ३६) तत्वचिन्तामण्यालोकविवेकः ३७) किरणावलिप्रकाशदीधितिव्याख्या ३८) स्वत्वनिरूपणम् अथवा स्वत्ववादः

प्रकृतमातृकापरिचयः

कारकवादः इति ग्रन्थरत्नस्य शुद्धपाठसम्पादनार्थं मातृका चतुष्टयमाश्रितम्। मातृकाचतुष्टयमपि कर्गजपत्रे एव लिखितं वर्तते। मातृकाः तिस्रः अपि देवनागरीलिप्यां लिखिताः अन्या एका तु तेलुगुलिप्यां वर्तते। अत्र एका एव मातृका सम्पूर्णा लभ्यते। अन्याः सर्वाः अपि असम्पूर्णा एव। पाठसम्पादनप्रक्रियायां मातृकाणां कृते लिपिमाधारीकृत्य सङ्केताक्षराणि

दत्तानि। देवनागरीमातृकाः Dn1,Dn2,Dn3 इति, तेलुगुमातृका TL1 इति च सङ्केतिताः।

Dn1 मातृका

एषा मातृका डा. श्रीवीरनारायणपाण्डुरङ्गिमहाभागानां सङ्ग्रहात् प्राप्तः। मातृकेयमुत्तरकर्णाटकप्रान्तीयेति ग्रन्थपरिशीलनेन ज्ञातम्। ग्रन्थस्यास्य लेखकस्य नाम लिङ्घेरिस्वामी इति ज्ञायते। अत्र ग्रन्थारम्भे ग्रन्थान्ते च लेखकेन स्वयमयमंशः लिखितः। एषा मातृका एव प्रामुख्येन स्वीकृता वर्तते, सम्पूर्णतः लभ्यते च।

मातृकाविवरणम् : सामग्री - कर्गजपत्रम्, पुटानि – २१, पङ्क्तयः - १४, प्रतिपङ्क्ति अक्षराणि – ५०, लिपिः - देवनागरी, स्थितिः - समीचीना

Dn2 मातृका

मातृकेयं तु क्षेमराजश्रीकृष्णदासश्रेष्ठिना मुम्बय्यां स्वकीये 'श्रीवेङ्कटेश्वर (स्टीम्) मुद्रणालये' मुद्रयित्वा १९६६ विक्रमसंवत्,१८३१ शाके, १९०९ क्रिस्तब्धे प्रकाशितं पुस्तकम् एव। पुस्तकमेतत् श्रीमतां पण्डितराजानां जालिहाळकेशवाचार्याणां पुस्तकालये प्राप्तम्। तत्पुत्रैः श्रीवरदाचार्यैः प्रदत्तम्। मातृकायां यथा वर्तते तद्वदेव मुद्रितमत्र। प्रथमपत्रादारभ्य अष्टमपत्रपर्यन्तो ग्रन्थः त्रुटितः।

मातृकाविवरणम् :_सामग्री - कर्गजपत्रम्, पुटानि – ६२, लुप्तपुटानि - १-८, पङ्क्तयः - १६, प्रतिपङ्क्ति अक्षराणि – २०, लिपिः - देवनागरी, स्थितिः - समीचीना

Dn3 मातृका

मातृका एषा तु शृङ्गगिरिशारदामठस्य मातृकासङ्ग्रहात् प्राप्ता। एषा अपि सम्पूर्णा नास्ति। अस्याः कानिचन पत्राणि लुप्तानि किन्तु यावत् लभ्यते तावत्तु समीचीनम् एव विद्यते।

मातृकाविवरणम् : सामग्री - कर्गजपत्रम्, पुटानि – २२, लुप्तपुटानि - १,४,१७,१८,१९,२०, पङ्क्तयः - १५, प्रतिपङ्क्ति अक्षराणि – ४८, लिपिः - देवनागरी, स्थितिः - समीचीना

TL1 मातृका

मातृकेयमपि शृङ्गगिरिशारदामठस्य मातृकासंग्रहात् एव प्राप्ता। एषा तु तेलुगुलिप्यां वर्तते। इयमपि सम्पूर्णा नास्ति। अत्र आदितः अधिकरणकारकस्य आरम्भपर्यन्तं पाठो लभ्यते।

मातृकाविवरणम् : सामग्री - कर्गजपत्रम्, पुटानि – ३६, पङ्क्तयः - १०, प्रतिपङ्क्ति अक्षराणि – ४०, लिपिः - तेलुगु, स्थितिः - समीचीना

पाठसम्पादनपद्धतिः

अस्य ग्रन्थस्य शुद्धपाठसम्पादने मातृकाचतुष्टयं समाश्रितम्। मातृकाद्वयमधिकं कार्यान्ते लब्धमिति त्यक्तम्। वङ्गदेशस्य, उत्तरदेशस्य च मातृकाः काले न सम्प्राप्ताः तथापि उत्तरदेश-मातृकामाश्रित्य शिलायन्त्रमुद्रणालये मुम्बय्यां क्वचित् मुद्रितः परन्तु सम्यक् अविशोधितः, कश्चित् पाठः हस्तगतो अभवत्। तमपि समाश्रित्य मया ग्रन्थस्यास्य पाठभेदानां परिशीलनपूर्वकं शुद्धतरः पाठः सम्पादितः। तत्र लेखकदोषाः पाठभेदेषु दृश्यन्ते। ते च सर्वथा वारिताः। क्वचित् व्याख्यातृप्रक्षेपाः दृश्यमानाः अधस्तात् तत्र तत्र

दर्शिताः। मया संशोधितः पाठः प्रकृतमातृकास्वलब्धः [ ] आयतावरणयोः मध्ये स्थापितः। लोपस्थले मया संयोजितः पाठः { } पुष्पावरणयोर्मध्ये संस्थापितः। वैकल्पिकः पाठस्तु ( ) वर्तुलावरणयोर्मध्ये योजितः। पाठभेदः पदमध्यगतः उभयतः पार्श्वयोः, एकस्मिन्नेव वा पर्श्वे '-' रेखादण्डेन संवलितः। लेखकयोजितः पाठः ***,**,** नक्षत्रैः चिह्नितः। लेखकयोजितः पाठः व्यवकलनचिह्नेन सहितया संख्यया उभयपार्श्वस्थया सूचितः। मातृकाणाम् आरम्भः '§' चिह्नैः, एवं मातृकाणां समापनं '$' चिह्नैः च सूचितः। पादटिप्पण्यां वर्तमानाः स्वाभिप्रायाः # इति चिह्नैः अङ्कितः। उदाहरणं - #इति नास्ति# इति। तदेवं मातृकाचतुष्टयं स्वीकृत्य प्रकृतः पाठः शुद्धतरः सम्पादितः। इतोऽपि पूर्वोत्तर-देशयोः मातृकाणां परिशीलनमपूर्वकं समीचीनतरः पाठः शक्यसम्पादः। तत्कार्यमचिरादेव क्रियते।

तत्र तत्र ग्रन्थे दीर्घतमानि न्यायपरिभाषामाश्रित्य लिखितानि लक्षणानि, विषमवाक्यानि, कठिनपदानि च विवृतानि। सैषा टिप्पणी ग्रन्थाध्ययनस्य फलत्वेन उद्गता पाठकानां सौकर्याय भवतीति विश्वासिमि। ग्रन्थान्ते च परिशिष्टरूपेण ग्रन्थे उदाहृतानि वाक्यानि दत्तानि।। इतः विद्वांसः प्रमाणम्।।

ग्रन्थस्यास्य सम्पादने कृतसाहाय्यां मम शिष्यां शिवजां तदीयपरिश्रममनुलक्ष्य समभिनन्दामि। एवं अस्य ग्रन्थस्य प्रकाशने बहुकृतोपकाराणाम् आचार्याणां पूर्णप्रज्ञसंशोधनालयस्य निदेशकानां डा.आनन्दतीर्थाचार्य-नागसम्पिगे-महोदयानां नितरामधमर्णोऽहम्।

तिरुपति

विद्वज्जनविधेयः

श्रीनिवासः वरखेडी

जयरामन्यायपञ्चाननभट्टाचार्यविरचितः

कारकवादः

*नत्वा शम्भोः[१] पदाम्भोजे
जयरामः समासतः।।
करोति [२]कारकव्याख्यामिह
सङ्ख्यावतां मुदे।।१।।

तत्र [३]कारकाणि कर्तृकर्मकरणसम्प्रदानापादानाधिकरणानि षट्। तत्त्वं च न क्रियानिमित्तत्वम्। 'चैत्रस्य तण्डुलं पचती'त्यादौ सम्बन्धिनि चैत्रादावतिव्याप्तेः[४] [अनुमत्यादि[५]] प्रकाशनद्वारा [सम्प्रदानादेरिव[६]] तण्डुलादिसम्पादनद्वारा सम्बन्धिनोऽपि पाकादि[७] क्रियानिमित्तत्वात्।

किन्तु क्रियान्वितविभक्त्यर्थान्वितत्वम्[i] तत्। अस्ति च [८]कर्तृकर्मादौ [९]क्रियान्विततिङ्सुब्विभक्त्यर्थान्वयः[१०]; न तूदाहृते सम्बन्धिनि। षष्ठ्यर्थ-

---

* 'श्रीमद्गुरुवरराघवेन्द्रतीर्थहृदम्भोजसुन्दरानन्दमन्दिरश्रीनिवासाय नमः' #इति Dn1 मद्ध्ये लेखकस्य अधिकः पाठः#, 'श्री गणेशाय नमः' #इति TL1 मद्ध्ये लेखकस्य अधिकः पाठः#

१ TL1 विष्णोः

२ Dn1 कारिक-

३ Dn1 कारकाणि #इति नास्ति।#

४ Dn1 -अतिव्याप्तिः

५ Dn1 अनुमित्यादि

६ Dn1 सम्प्रदानादेरेव

७ TL1 आदि- #इति नास्ति।#

८ Dn1 कर्तृकर्मादौ #इति नास्ति।#

९ Dn1 तद्विभक्तिकर्तृकर्मादौ

सम्बन्धस्य तण्डुलादिनामार्थान्वितत्तया[११] क्रियानन्वितत्वात्। 'चैत्रस्य पचति' इत्यादावपि तण्डुलादिपदाध्याहारेणैव बोधः। षष्ठ्यर्थसम्बन्धस्य नामार्थेनैव क्रियायाः कर्मत्वादिनैव साकांक्षतया परस्पराकांक्षा विरहात्। 'ओदनस्य [पक्ता [१२]]', 'मैत्रस्य [१३] पाक' इत्यादौ कर्मत्वकर्तृत्वार्थिका षष्ठी कारकविभक्तिरेव, "कर्तृकर्मणोः कृतीत्यनेन[ii]"[१४] तद्विधानात्। अत एव[iii] सम्बन्धस्य न कारकत्वम्, क्रियायोगाभावात् इति शाब्दिकाः[१५]। अत एव च[१६] "गुरुविप्र[तपस्वि [१७]]दुर्गतानां प्रतिकुर्वीत [१८] भिषक् स्वभेषजै"रित्यादौ [१९] रोगमित्यादीनामध्याहारेणैव बोधः। यदि च विनाध्याहारं [२०] तत्र क्रियायां षष्ठ्यर्थसम्बन्धान्वयः प्रामाणिकः, तदा क्रियान्वित [२१] कर्तृत्व-कर्मत्वादिषट्कान्यतमान्वयित्वं[iv] कारकत्वं [२२] बोध्यम् ।।

---

१० Dn1 च #इत्यधिकम्।#
११ Dn1 -नार्थान्वित
१२ TL1 वक्ता, Dn1 भोक्ता
१३ TL1 चैत्रस्य
१४ Dn1 कर्तृकर्मणोस्तृतीयेत्यनेन
१५ Dn1 इति शाब्दिकाः। #इति नास्ति।#
१६ TL1 च #इति नास्ति।#
१७ TL1 -विप्रतस्वि- , Dn1 -पतस्वि-
१८ Dn1 अक्षरलोपः
१९ TL1 सा लक्ष्मीरुपकुरुते यथा परेषामित्यादौ च #इत्यधिकम्।#
२० Dn1 ततः
२१ Dn1 -कर्मत्वं कर्मत्वादि-
२२ Dn1 कारकत्वं #इति नास्ति।#

अत एव §'चर्मणि द्वीपिनं हन्ती[v]'त्यादौ[२३] निमित्तादेरपि[२४] न कारकत्वमित्येताः[२५] उपपदविभक्तयः; न [२६] कारकविभक्तयः।

'गां पयो दोग्धि' 'अजां ग्रामं नयती'त्यादौ[२७] गौणमुख्यकर्मद्वयमपि लक्ष्यम्। अत्र हि द्रवद्रव्यविभागानुकूलक्रियानुकूलव्यापारविशेषः कर्तृनिष्ठो दुहेरर्थः। 'वायुः[२८] [वृक्षात्][२९] पर्णं दोग्धी'ति[३०] वारणाय द्रवद्रव्येति[vi]। [-२]'मेघो गगनात्[३१] जलं दोग्धी'त्यादि[२-]वारणाय विशेष इति। स च[३२] विशेषो [-३]'दुहि'धातुप्रयोगगम्यः। इत्थं च द्रवद्रव्येति[३३] न देयमित्यपि[३४] वदन्ति। संयोगानुकूलक्रियानुकूलव्यापारस्तादृशो[३५] नी (णीञ्[३६]) धातोरर्थः।[३-]

---

§ Dn3 अत्रारभ्यते।
२३ Dn3 हन्ति दन्तयोर्हन्ति कुञ्जरम्।। बालेषु व्यजनं हन्ति सीम्नि पुष्कलको हतः।। इत्यादौ ,
२४ Dn3 निमित्तत्वादेरपि
२५ Dn3 -इत्येतावता
२६ Dn3 तु #इत्यधिकम्।#
२७ Dn3 यपयातीत्यादौ
२८ Dn3 वायुं
२९ Dn1 वृक्षं
३० Dn3 दोग्धीत्यादौ, TL1 दोग्धीदि
- २ Dn3 मेघगगं जलं दोग्धीति, TL1 गगनं जलं दोग्धीदि
३१ Dn1 गगनं
२-
३२ TL1, Dn3 स च #इति नास्ति।#
-३ Dn3 दुहधातोस्तत्राधे विभागे
३३ TL1 द्रवद्रव्येत्यपि
३४ TL1 देयमेवेत्यपि
३५ TL1 -व्यापारः कतृनिष्ठे
३६ Dn1 नीङ्-

तत्राद्ये विभागे गामित्यस्य क्रियायां पय [३७] इत्यस्यान्वयात्, [vii] गोवृत्तिविभागानुकूलपयोवृत्तिक्रियानुकूलव्यापारानुकूलप्रयत्नवानिति [३८] वाक्यार्थः। द्वितीये ग्राममित्यस्य संयोगेऽजामित्यस्य [३९] क्रियायामन्वयात्, [viii] ग्रामवृत्तिसंयोगानुकूलाजावृत्तिक्रियानुकूलव्यापारानुकूलकृतिमानिति [४०] वाक्यार्थः। साक्षात् धात्वर्थतावच्छेदकनिरुक्तक्रियाद्वयरूप [४१] फलद्वयान्वयिनोः [४२] अजापयसोर्मुख्यकर्मत्वम्।तादृशक्रियारूपफलावच्छेदकविभागसंयोग [४३] रूपफलद्वयान्वयिनो [४४] र्गोग्रामयोर्गौणकर्मत्वम् [४५]। [ix]

उभयत्रापि [४६] धात्वर्थान्वितविभक्त्यर्थान्वितत्वमस्ति। फलद्वयस्यापि धात्वर्थत्वात्। अत एव कर्मद्वयसाकांक्षफलबोधकधातुत्वं द्विकर्मकत्वं सूपपादम् [४७]।।

यत्तु विभागानुकूलक्रिया दुहे [४८] रर्थः; संयोगानुकूलक्रिया नयतेरर्थः [४९]; न तु तदुभयानुकूल [५०] व्यापारः। कर्मद्वयस्यापि एकत्र फलेऽन्वय [५१] इति। तन्न।

३-
३७ Dn1 पय #इति नास्ति।#, TL1 पय इत्यन्यचान्व...
३८ TL1-यत्न-, Dn3 -यत्नवान्वाक्यार्थः
३९ TL1 च #इत्यधिकम्।#
४० TL1 -यत्नवानिति, Dn3 -कृतिमान्
४१ TL1 क्रिया द्वयरूप = संयोगविभागानुकूलक्रियेत्यर्थः।
४२ Dn1 -फलान्वयान्वयि, Dn3 -फलान्वितान्वयिना
४३ Dn3 -क्रिया-
४४ Dn1 -फलद्वयान्वयान्वयि, Dn3 -फलद्वयान्वितान्वयिनोः
४५ Dn1 -गौणत्वम्
४६ TL1, Dn3 उभयत्रैव
४७ Dn3 सूपपदं

[अजापयसोः [५२]] कर्मत्वानुपपत्तेः। परसमवेतत्वस्य [५३] क्रियायामभावात्। कर्मद्वयस्याप्येकत्र फलेऽन्वये च गौणमुख्यव्यवहारो न स्यात्।।

एतेन विभागानुकूला[५४] कर्तृगता चेष्टा[५५] दुहेरर्थः[५६] इत्यपास्तम्[५७]। फलद्वयाप्रवेशे[५८] गौणमुख्यव्यवहारो न स्यात्[५९]।।

यदपि गामित्यस्यार्थो गोवृत्तित्वम् पयस्येवान्वेतीति गौणकर्म न लक्ष्यमिति [६०] । तदपि न। 'गौः [६१] दुह्यते' इत्यत्र[६२] गोः कर्मत्वस्य[६३] दुरपवादत्वात्[६४]। अजां ग्राममित्यादौ ग्रामवृत्तित्वस्य [प्राग् अजायामसत्वेन[६५]]

---

४८ TL1 दुहिः
४९ Dn1 नपतेरर्थः, Dn3 नयतेरर्थः
५० TL1 –कर्तृ- #इत्यधिकम्। #
५१ TL1 -विभागे संयोगचान्वय-, Dn3 -विभागेऽन्वयः
५२ TL1, Dn3 पयोऽजयोः, Dn1 अजपयसोः
५३ Dn1 परसमवेत-
५४ TL1, Dn3 विभागाद्यनुकूला-
५५ TL1, Dn3 चेष्टैव
५६ Dn3 दुहादेरर्थः
५७ TL1 इत्यपि परास्तम्
५८ TL1 -प्रवेशेन
५९ Dn1 -व्यवहारानापत्तेः
६० TL1 गौणकर्मलक्ष्यमिति, Dn1 गौणकर्मत्वमलक्ष्यमिति
६१ TL1,Dn1,Dn3 पयो #इत्यधिकम्।#
६२ TL1 इत्यादौ
६३ TL1 कर्मत्वस्य, Dn1 कारकत्वस्य
६४ Dn3 दुरपपादत्वात्
६५ Dn3 प्रागजामसत्वे-, Dn1 प्रागजायासत्वेना-

अन्वयायोगात्। 'काशीतः प्रयागं[६६] नीयमानामजां काशीं नयती'ति[६७] प्रयोगापत्तेश्च।

।।इति कारकसामान्यलक्षणम्[६८]।।

कर्तृकारकवादः

तत्र तत्तत्क्रियानुकूलकृतिमत्त्वं तत्तत्क्रियाकर्तृत्वम्। काष्ठादौ[६९] पाकानुकूल[७०]व्यापारवत्त्व-प्रतिसन्धानेऽपि[७१]कर्तृपदाप्रयोगात्कृताकृतविभागादिना सिद्ध[७२] यत्नशक्तिकेन कृ[७३] धातुना तृजन्तेन सिद्धस्य कर्तृपदस्य[७४] यत्नाश्रयबोधनाच्च[७५]। अचेतने कर्तृपदप्रयोगो[७६] गौणः। [विष्टि[७७]]गुरुतर-भारोत्तारणादि[७८] क्रियाविषयकयत्नवत्वेऽपि[७९] ततः[८०] क्रियायाः अनिष्पत्तौ[८१] तत्क्रियाकर्तृता[८२]व्यवहारात्, विषयत्वं[८३] विहायानुकूलत्वमुपात्तम्।

---

६६ Dn3 प्रयागे
६७ Dn3 नयत्वातीति
६८ इति कारकसामान्यलक्षणम् #इति TL1, Dn3, च मध्ये नास्ति।#
६९ TL1 पाकादौ
७० Dn1 अक्षराणि लुप्तानि, Dn3 पाकाद्यनुकूल-
७१ TL1 -प्रतिसन्धानपि
७२ TL1 -यत्नशक्तिरेक, Dn1 -यत्ने शक्तिक
७३ Dn1 कृञ्-
७४ TL1 कर्तृशब्दस्य
७५ TL1, Dn3 -बोधकत्वाच्च
७६ TL1 अचेतनेककर्तृपदप्रयोगस्तु, Dn1 अचेतनेककृपदप्रयोगस्त
७७ Dn1 वृष्टि-
७८ TL1 -भारोत्तुलनादि, Dn3 -भारोत्वोलनादि
७९ Dn1 -यत्नत्वे, Dn3 -यत्नत्वेऽपि
८० Dn3 ,TL1 तत्तत्

यदि[८४] 'मत्तो भूतं न तु[८५] मया कृत'मिति व्यपदेशान्नान्तरीयक[८६]-कृतिसाध्यस्य 'पिष्टमध्यस्थशर्करा[८७] भोजनस्यापि'[८८] न कर्तृत्वं, तदा विषयत्वमपि[८९] निवेश्यम्[$]। तच्च साध्यत्वेन तेन[९०] यागादिकृतेरुद्देश्यत्वेन स्वर्गादिविषयत्वेऽपि[९१] यागादिकर्तुः [न] स्वर्गादिकर्तृत्वम्। अस्मदादि कर्तृकपाकादिकर्तृकत्वमीश्वरस्यापीष्टमेव[९२]। तथाविवक्षायामीश्वरः पचतीति प्रयोगोऽपीष्टम् एव। [९३] नोचेत्क्रियात्वानवच्छिन्नजन्यतानिरूपित [मसाधारणमनुकूलत्व?[९४]] [§]निवेश्यमिति नैय्यायिकाः।।

---

८१ Dn1 न #इत्यधिकम्।#
८२ TL1 तत्क्रियाकर्तृत्वान्वय-, Dn3 तत्तत्क्रियाकर्तृत्वा-
८३ TL1 विषयकत्वं
८४ TL1, Dn3 च #इत्यधिकम्।#
८५ TL1 तु #इति नास्ति।#
८६ Dn3 -कृ- #इति नास्ति।#
८७ TL1 शर्करादि-, Dn3 शर्कर-
८८ Dn1,TL1 अपि #इति नास्ति।#
८९ TL1 विषयकत्वमपि, Dn3 विषयित्वमपि
$ #Dn3 अत्र समाप्ता#
९० TL1 तेन #इति नास्ति।#
९१ Dn1 -विषयकत्वेन
९२ TL1 -कर्तृत्वमीश्वरस्यष्ठं
९३ TL1 -नोचेत्कार्यत्वाव-
९४ TL1 -तमसाधारणत्वमनुकूलत्वं, Dn1 -साधारणानुकूलत्वं
§ #Dn2 अत्रारभ्यते।#

वैय्याकरणास्तु, “अनभिहिते [x] कर्तरि” इत्यनुशासनात् [९५] अचेतनेऽपि [९६] कर्तृपदप्रयोगात् क्रियाश्रयत्वमेव [९७] कर्तृत्वम्। कारककर्मादिपदवत्कृ [९८] धातुरप्यत्र क्रियार्थक एव [९९]। आश्रयत्वमिह आख्यातार्थः [१००]। तथा च यगाद्य [१०१] समभिव्याहृताख्यातेन यद्धात्वर्थान्वित-यद्धर्मवत्त्वं बोध्यते, तद्धात्वर्थनिरूपिततद्धर्मवत्त्वं तद्धात्वर्थकर्तृत्वम्। [xi] यथा पचतीत्यस्य [१०२] पाकानुकूलव्यापारवत्त्वं, [१०३] जानातीत्यादौ ज्ञानाश्रयत्वं, नश्यतीत्यादौ नाशप्रतियोगित्वम् इति [१०४]। ‘चैत्रेण पच्यते तण्डुल’ [१०५] इत्यादौ पाकजन्यफलाश्रयत्व [१०६] वारणाय यगाद्य [१०७] समभिव्याहृतेति। [xii] अत्र [१०८] चैत्रादेः कर्तृत्वं तु पचतीत्याद्याख्यात [१०९] बोध्यधर्ममादाय [११०] बोध्यम्। धात्वर्थान्वित-

---

९५ Dn1 कर्तरीत्यादा-
९६ TL1 चेतनेऽपि, Dn1 अपि #इति नास्ति।#
९७ TL1 एव #इति नास्ति।#
९८ Dn1 कृञ्
९९ Dn1 क्रियार्थमेव
१०० Dn1 तत्तदाख्यातद्वारा
१०१ Dn2 यागाद्य, Dn1 यत्नाद्य
१०२ TL1,Dn2 पचतीत्यादौ
१०३ TL1 पाकाद्यनुकूलव्यापारत्वं
१०४ TL1, Dn1 इति #इति नास्ति।#
१०५ Dn2 तण्डुलः पच्यते
१०६ TL1 सारजन्यफलाश्रयत्व-, Dn1 परजन्यफलाश्रयत्व-
१०७ Dn2 यागाद्य, Dn1 यत्नाद्य
१०८ TL1 अत्र #इति नास्ति।#
१०९ TL1 पचतीत्याख्यात-, Dn1 पचतीत्याधात्वख्यात-
११० TL1 -आदायेति, Dn2 -आदायैवेति

द्वितीयाद्यर्थकर्मत्व[१११]करणत्व[११२]वारणायाख्यातेनेति[११३]। जानातीत्यत्राख्यातार्थ आश्रयत्वं[११४], न पाककर्तृत्वं;[११५] हन्तीत्यत्र[११६] हिंसाश्रयत्वं; न गमन-कर्तृत्वमित्येतत्सम्पत्तये यत्तदिति[११७] धात्वर्थविशेषणम्।

यदि च[११८] 'काष्ठं पचति', 'स्थाली पचती'त्यादिप्रयोगात्[११९] करणादीनां कर्तृत्वमिष्टम्, तदा[१२०] 'पच्यते ओदनः स्वयमेवे'त्यादौ[xiii] कर्मकर्तृ[१२१]कर्मणोऽपि तदिष्टम्।

'ओदनः स्वयं पचती'त्यादिप्रयोगस्त्व[१२२] साधुः[१२३]।

[-४]'चैत्रो मैत्रं ग्रामम्[१२४] गमयती'त्यादौ मैत्रादेः[१२५] कर्तृत्वमिष्टमेव।[xiv] तत्र गमनानुकूलव्यापारो णिजन्तार्थः। तदनुकूलव्यापार आख्यातस्य। तत्र

---

१११ Dn1 -कर्तृत्व- #इत्यधिकम्।#
११२ TL1 -करणत्वादिः
११३ TL1 -वारणीयाख्यातेनेति, Dn2 -त्वमादायाख्यातेनेति
११४ TL1 जानातीत्याख्यातार्थाश्रयत्वं, Dn2 जानातीत्याद्याख्यातार्थाश्रयत्वं
११५ Dn1 पाकाश्रयत्वं
११६ Dn2 हन्तीत्यादौ
११७ TL1 त्तदिति, Dn1 यदिति
११८ Dn2 च #इति नास्ति।#
११९ Dn2 -प्रयोगवशात्
१२० Dn1 तदा #इति नास्ति।#
१२१ TL1 कर्मकर्तरि-, Dn1 कर्मकर्तृ- #इति नास्ति।#
१२२ TL1 स्वंपचतीदि प्रयोगस्य-, Dn2 स्वयं पचतीत्यप्रयोगस्त्व-
१२३ TL1, Dn2 -साधुत्वात्
-४ Dn2 चैत्रो मैत्रम् .... सत्वाच्चेति #पर्यन्तं नास्ति।#
१२४ TL1 ग्रामम् #इति नास्ति।#
१२५ TL1 चैत्रादेः

णिजर्थव्यापारस्यापि[१२६] गच्छतीत्याद्याख्यातार्थत्वात्,[१२७] अनुकूलकृतिमत्वस्यापि अत्र सत्वाच्चेति।[४-] [-५]यदिच णिजर्थव्यापारे मैत्रमित्यस्यान्वयः, तदात्वे धात्वर्थव्यापारस्य मैत्रनिष्ठत्वेन मैत्रस्य कर्मत्वानापत्तिः। किन्तु, गमन[कर्म]ग्रामवृत्तिसंयोगानुकूल-व्यापाराश्रयत्ववांश्चैत्र इत्यन्वयबोधात् [तादृश]गमनान्वितद्वितीयार्थ-वृत्तित्वान्वितत्वेन [xv] मैत्रस्य [कर्मणोऽपि] कर्तृत्वमप्रत्यूहमिति[५-] किमाख्यातपदेनेति [१२८] विभाव्यते। तदा [१२९] कर्मत्व[१३०]विशिष्टस्य कर्तृरूपता[१३१]वारणाय तदुपादेयम्। [§]न हि कर्मादेः[१३२] कर्तृरूपत्वेऽनभिहिते [xvi]कर्तरि तृतीयेत्याद्यनुशासनं[१३३] सङ्गच्छत इत्याहुः।।

यत्तु "स्वतन्त्रः कर्ता [xvii] " इति पाणिनिसत्रात् [-६]कारकान्तराप्रयोज्यत्वे[१३४] सति कारकान्तरप्रयोजकत्वं कर्तृत्वम्। [६-] सत्यन्तेन

---

१२६ Dn1,Dn2 अपि #इति नास्ति।#
१२७ Dn1 गच्छतात्याख्यातार्थत्वात्
४-
-५ Dn1,Dn2 यदि.....हमिति #पर्यन्तं नास्ति।#
५-
१२८ Dn1, कर्माख्यातपदेनेति, Dn2 कर्माख्यातयागादिर्नेह
१२९ Dn2 तदा #इति नास्ति।#
१३० TL1 करणत्व-
१३१ Dn1 रूपता #इति नास्ति।#
§ #Dn3 अत्रारभ्यते पुनः।#
१३२ Dn3 कर्मत्व-
१३३ Dn1 कर्तरीत्याद्यनुशासनार्थः
-६ Dn1 कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वं कर्तृत्वम्। #इति नास्ति।#
१३४ Dn3 -प्रयोजकान्यत्वे
६-

पुरुषजन्य [१३५] संयोगादिरूपव्यापारवत्त्वरूप [१३६] तत्प्रयोज्यत्ववतः [१३७] कुठारादेर्व्युदासः [१३८] इति। तन्न। ईश्वरप्रयोज्यानां जीवानां [१३९] कर्तृत्वानापत्तेः [१४०] । दण्डादिजन्य [१४१] संयोगादिरूपव्यापारवति कुलालादावव्याप्तेश्चेति दिक्।

।। इति कर्तृकारक[म्][१४२] ।।

कर्मकारकवादः

अथ[१४३] किं नाम[१४४] कर्मत्वम्? न करणव्यापारित्वम्।,[१४५] तद्धि[१४६] करणजन्यव्यापारवत्त्वं 'दात्रेण धान्यं लुनाती'त्यादौ हस्तादिकरणव्यापारवति [१४७] दात्रादावतिव्याप्तम्। नापि परसमवेतक्रियाजन्यफलशालित्वम्। गमिपत्योः कर्मत्वस्य [१४८] पूर्वस्मिन् देशे,

---

१३५ TL1, Dn3, Dn2 पुरुषादिजन्य-
१३६ TL1 -व्यापारवत्त्व- #इति नास्ति।#
१३७ Dn1 -तत्प्रयोजकत्ववतः, Dn2 -तत्प्रयोज्यत्ववत्
१३८ Dn3 कुटादेर्व्युदासः, Dn2 कुरादेर्व्युदासः
१३९ TL1 ईश्वरप्रयोज्यजीवानां, Dn3 ईश्वरप्रयोज्यानां बीजादीनां, Dn1 जीवानां #इति नास्ति।#
१४० Dn3 कर्तृत्वापत्तेः
१४१ Dn2 -आदि- #इति नास्ति।#
१४२ Dn1 इति कर्तृकारकः, TL1, Dn3, Dn2 इति कर्तृकारकः #इति नास्ति।#
१४३ Dn2 अथ किं #इति नास्ति।#
१४४ TL1, Dn3, Dn2 नाम #इति नास्ति।#
१४५ TL1 करणव्यापार्यत्वं, Dn1 करणव्यापारवत्त्वं
१४६ Dn3 तद्धि #इति नास्ति।#
१४७ TL1 -करणव्यापार्यत्वं, Dn3 -करणकव्यापार्ये भस्त्रादावपि, Dn1 -करणव्यापारि
१४८ Dn1 सर्वदेशे

त्यजेश्चोत्तरस्मिन्, स्पंदेश्च[१४९] पूर्वपरयोः प्रसंगात्। ‘नदी वर्धत’ इत्यादौ वृद्धेरवयवोपचय[१५०] रूपायाः परम्परया[१५१] फलस्य[१५२] तीरप्राप्तिरूपस्याश्रये[१५३] तीरे कर्मत्वापत्तेश्चेति चेत्[१५४]।।

अत्र वदन्ति - [xviii]धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वम्। तादृशं च[१५५] फलङ्गमेः संयोगः, त्यजेर्विभागः[१५६], पतेरधःसंयोगः; तदवच्छिन्ने[१५७] स्पंदे तेषां[१५८] शक्तिः[१५९]। स्पंदमात्रे तेषां शक्तौ पर्यायतापत्तेः। स्पंदेः वृध्[१६०]धातोश्च न[१६१] फलावच्छिन्नव्यापारे[१६२] शक्तिरिति न कोऽपि दोषः। फलावच्छिन्नव्यापारबोधकत्वादेव[१६३] धातूनां सकर्मकत्वव्यवहारो[१६४] मुख्यः।

---

१४९ Dn1 स्पंदे, Dn2 स्पंदेः

१५० Dn1 वृद्धेरेवापचति-, Dn3 वृधेरवयवोपचय-, Dn2 वृद्धेरवयवोपचय-

१५१ Dn1 परम्परायाः

१५२ TL1, Dn2 फलस्य #इति नास्ति।#

१५३ TL1 तीर्थप्राप्तिरूपस्याश्रये, Dn3 तीरत्वप्राप्तिरूपस्यान्वये, Dn2 तीरप्राप्तिरूपयत्नस्याश्रये

१५४ Dn1 कर्मत्वापत्तेरितिचेत् , Dn3 कर्मत्वापत्तेश्चेति दिक्, Dn2 कर्मत्वप्राप्तिश्चेत्

१५५ Dn2 च #इति नास्ति।#

१५६ TL1 फलङ्गमः संयोगः त्यजेर्विभागः, Dn1 फलङ्गमेस्त्यजेर्विभागः, Dn2 फलङ्गमेः संयोगस्त्यजेर्विभागः

१५७ Dn1 -अवच्छिन्न-

१५८ Dn2 तेषां #इति नास्ति।#

१५९ TL1 शक्तेः

१६० Dn1 वृद्धि-, Dn2 वृद्ध-

१६१ Dn1 न #इति नास्ति।#

१६२ Dn3, Dn2, Dn1 न #इत्यधिकम्।#

१६३ Dn3 च #इत्यधिकम्।#

१६४ Dn2 -व्यापारो मुख्यः

जानातीत्यादीनां [१६५] तु [१६६] नामार्थान्वितोद्देश्यत्वातिरिक्त [१६७] विषयत्वरूप-विभक्त्यर्थान्वय्यर्थकत्वं [१६८] गौणं सकर्मकत्वम्। घटं जानातीत्यादितो [१६९] [१७०] घटविषयताशालिज्ञानाश्रयता [१७१] वानिति बोधात् [१७२]। तादृशधातुयोग [१७३] एवं च [१७४] कर्म [१७५] प्रत्ययः।

अत एवाभुंजानेऽपि [१७६] 'भोजनाय यतत' [-६] इति प्रयोगात् 'यत्' - [१७७] धात्वर्थे [१७८] चतुर्थ्यर्थोद्देश्यत्वस्यैवान्वयात् न यतेः सकर्मकत्वम् [१७९]; न वा 'भोजनं [६-] यतत' इति प्रयोगः।

अत्र [१८०] 'भूमिं प्रयाति विहगो, विजहाति महीरुहं, न तु [१८१] स्वात्मानमिति' प्रयोगात् स्वस्य धात्वर्थतावच्छेदकसंयोगविभागरूपफल-

---

१६५ Dn2 ज्ञा धात्वादीनां
१६६ Dn2 तु #इति नास्ति।#
१६७ TL1 -त्वारिक्त-
१६८ Dn3 -विभक्त्यर्थान्वयार्थकत्वं, Dn1 -विभक्त्यर्थान्वयित्वं
१६९ Dn3 जानातीत्यादौ, Dn2 जानातीत्यादीनां
१७० Dn3,Dn2 तु #इत्यधिकम्।#
१७१ Dn1 -श्रयवानिति
१७२ Dn2 बोधः
१७३ Dn2 -धातुप्रयोग
१७४ Dn1 च #इति नास्ति।#
१७५ Dn3 धातु-
१७६ Dn1 एव भुंजाने, Dn1 एव भुंजानेऽपि, Dn2 एवांभुंजान
-६ TL1 यतत इति.....न वा भोजनं #पर्यन्तं नास्ति।#
१७७ Dn1 यति, Dn2 यत्
१७८ Dn1 नामार्थान्वितस्य #इति नास्ति।#
१७९ Dn1 सकर्मत्वम्
६-

शालित्वेऽपि[१८२] कर्मत्वाभावात्, परसमवेतक्रियाजन्यत्वमपि धात्वर्थतावच्छेदक-फले निवेश्यम्। न चैवमपि 'मल्लो मल्लं गच्छती'त्यादावुभयकर्मज-संयोगरूप[१८३]फलस्य तादृशत्वात् स्वकर्तृकक्रियाकर्मत्व[१८४]व्यवहारः स्वस्मिन्[१८५] स्यात् इति वाच्यम्[१८६]।[-७]परसमवेत[यत्] क्रियाजन्यतादृशफलशालित्वं यत्र तत्र तत्क्रियाकर्मत्वस्य [१८७] स्वीकारात्।[७-] इत्थं च द्वितीयादेः क्रियान्वयि [१८८] परसमवेतत्वमप्य [१८९] र्थः। परत्वं स्वप्रकृत्यर्थापेक्षया [१९०] सुपा स्वार्थफलान्वय्यपेक्षया[१९१] कर्माख्यातेन बोध्यते[१९२]। [-८]तथा च 'भूमिर्गम्यत' इत्यादौ कर्मख्यातस्थले फलं परसमवेतत्वं चाख्यातार्थः। भूमिपदार्थस्य परत्वे विशेषणत्वेन, फलं प्रति विशेष्यत्वेन चान्वयः। तथा च [xix]

---

१८० Dn2 अत्र #इति नास्ति।#

१८१ TL1 नत्वात्मानमिति

१८२ Dn2 -फलशालित्वरूपसकर्मत्वाभावात्।

१८३ Dn1 -रूप- #इति नास्ति।#

१८४ Dn2 -रूप- #इत्यधिकम्।#

१८५ Dn1 स्वस्मिन् #इति नास्ति।#

१८६ Dn1 इति वाच्यम् #इति नास्ति।#

-७ Dn1 परसम.....स्वीकारात्।#पर्यन्तं नास्ति।#

१८७ Dn3 क्रियाकर्मत्वस्य, Dn2 कर्मत्वस्य

७-

१८८ Dn1 क्रियान्वयि #इति नास्ति।#

१८९ Dn1 -अपि- #इति नास्ति।#

१९० TL1 परत्वं सुपास्वार्थ

१९१ Dn3 फलान्विय्यपेक्षया

१९२ Dn1 कर्मख्यातत्वेन बोध्यते, Dn3 कर्माख्यातेन बोध्यते।, Dn2 कर्माख्यातेन च बोध्यते।

-८ Dn1,TL1,Dn3 तथा च .....यबोधः। #पर्यन्तं नास्ति।#

भूमिभिन्नसमवेतक्रियाजन्यफलशालिनी भूमिरित्यन्वयबोधः।[८-] तथा च 'भूमिं प्रयाती'[१९३] त्यादितः भूमिभिन्नसमवेतभूमिवृत्तिसंयोगजनकस्पंदानुकूल-कृतिमानिति[xx] शाब्दबोधः[१९४]। एवं च स्वभिन्नसमवेतं[१९५] स्ववृत्तिसंयोग[१९६]जनकं यन्मल्लान्तरवृत्ति गमनं तदनुकूलकृतिमत्वस्य[१९७] स्वस्मिन्नभावात्[१९८] 'न मल्लः स्वं[१९९] गच्छती'त्यादिप्रयोगः।

नन्वत्र परत्वे[२००] स्वप्रकृत्यर्थस्यान्वयितावच्छेदकावच्छिन्न[२०१]-प्रतियोगिताकत्वेन[२०२] प्रतियोगितामात्रेण वान्वयः। नाद्यः,[२०३] 'पृथिवीं प्रयाति खगः'[२०४] इत्यादौ अनन्वयापत्तेः[२०५]। खगस्य[२०६] पृथिवीत्वावच्छिन्न[२०७]-

---

८-

१९३ TL1 प्रयाति विहगो विजहाति महीरुहमित्यादितो

१९४ Dn1 -मानिति बोधः।, Dn2 -मानित्यन्वय बोधः।

१९५ Dn1 स्वात्मभिन्नसमवेत-

१९६ TL1 -स्ववृत्ति-, Dn1 -स्वात्मवृत्तिसंयोग

१९७ Dn1 -कृतित्वस्य

१९८ Dn3 स्वभिन्नाभावात्, Dn2 स्वस्मिन्नभावादेव

१९९ Dn1 स्वात्मानं

२०० Dn3, Dn2 स्व- #इत्यधिकम्।#

२०१ Dn3 -वच्छिन्नं

२०२ Dn1,TL1 -प्रतियोगितया

२०३ Dn2 नाद्यः #इति नास्ति।#

२०४ Dn3 विहग

२०५ Dn3 अन्वयापत्तेः

२०६ TL1 स्त्वस्य

२०७ Dn2 पृथिवीत्वावच्छिन्नत्वात्

भिन्नत्वाभावात्। न द्वितीयः, स्वात्मन्यपि स्वात्मघटोभयभेदसत्वात्[२०८] स्वात्मानं[२०९] प्रयातीत्यापत्तेरिति चेत् न,[२१०] द्वितीयार्थे[२११] फले यद्व्यक्तेरन्वयस्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रकृत्यर्थस्य कर्माख्यातार्थफलान्वयिनश्च परत्वेऽन्वयात्[२१२]। इत्थं च[२१३] 'पृथिवीं प्रयाति' इत्यादौ यत्पृथिवीव्यक्तिवृत्ति[२१४]संयोगजनकत्वं प्रयाणस्य[२१५] तद्व्यक्तिभिन्नत्वं विहगेऽस्ति इति न दोषः[२१६]।।

परे तु 'पृथिवीं प्रयाति'[२१७] इत्यादौ पृथिवीपदं कर्मीभूततत्तत्[२१८]-पृथिवीव्यक्तिपरम्। एवमन्यत्र कर्मवाचकसामान्यपदं लक्षणया विशेषपरम्। इत्थं चान्वयितावच्छेदका[२१९] वच्छिन्नप्रतियोगिताकत्व[२२०] व्युत्पत्तेर्न भङ्ग इत्याहुः।

---

२०८ TL1, Dn3 स्वघटोभयभेदसत्वात्, Dn2 खगपृथ्व्युपयभेदसत्वात्
२०९ TL1,Dn3,Dn2 स्वं
२१० Dn1 न #इति नास्ति।#
२११ TL1, Dn2 द्वितीयाद्यर्थफले
२१२ Dn1 परत्वेनान्वयात्
२१३ Dn3 च #इति नास्ति।#
२१४ Dn1 -वृत्ति- #इति नास्ति।#
२१५ Dn1 प्रापणस्य
२१६ Dn1 इत्यदोषः
२१७ Dn2 प्रयाति #इति नास्ति।#
२१८ Dn1 कर्मत्वभूत-
२१९ Dn1 -वच्छेदका- #इति आवर्तनम्।#
२२० Dn1 -प्रतियोगिताक-, Dn2 -प्रतियोगितास्तादृक्-

यत्तु परसमवेतत्वं[२२१] नार्थः; किन्त्वन्योन्याभावप्रतियोगितावच्छेदकत्वं [२२२] क्रियान्वयि द्वितीयार्थः। तथा च [xxi] भूमिवृत्तिसंयोगजनकभूमिनिष्ठान्योन्याभावप्रतियोगितावच्छेदकप्रयाणानुकूल[२२३] कृतिमानित्यर्थः। स्ववृत्तिक्रियायाः स्वनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वान्न[२२४] 'स्वं[२२५] प्रयाती'ति प्रयोग इति[२२६] तन्न । एवमपि 'येन मल्लेन मल्लान्तरं न गतं सोऽपि मल्लो मल्लान्तरं गच्छती'तिप्रयोगापत्तिः [२२७] । मल्लान्तरनिष्ठ [२२८] भेदप्रतियोगितावच्छेदिकायाः तन्मल्लवृत्ति [२२९] क्रियायास्तन्मल्लवृत्ति [२३०] संयोगजनकत्वात्। यन्मल्लव्यक्तेः फलान्वयः तस्या एवान्योन्याभावेऽन्वयोक्तौ [२३१] तद्व्यक्तित्वादेः प्रकारत्वे च[२३२] शक्त्यानन्त्यम्। [२३३] कर्मवाचकपदस्य तत्तद्व्यक्तित्वावच्छिन्ने लक्षणास्वीकारेऽपि[२३४] युगपद्वृत्तिद्वयविरोधप्रसंगः।

---

२२१ Dn1, Dn3,TL1 परसमवेततत्वं
२२२ Dn1,Dn3,TL1 -वच्छेदकत्व-
२२३ TL1 -प्रयोगानुकूल-, Dn3 -प्रमाणानुकूल-, Dn2 -प्रापणानुकूल-
२२४ Dn3 -प्रतियोगितावच्छेदकत्वान्न
२२५ Dn1 स्वात्मान-
२२६ TL1 प्रयातीत्यापत्तिः, Dn3 प्रयातीति आपत्तेरिति चेन्न।
२२७ TL1, Dn3 गच्छतीति प्रयोगापत्तेः, Dn1 गच्छतीत्यादिप्रयोगापत्तिः
२२८ TL1, Dn3 -वृत्ति-
२२९ Dn,TL1 -वृत्ति- #इति नास्ति।#
२३० Dn2,Dn1 -भूमि- #इत्यधिकम्।#
२३१ Dn2 दोषवारणे तु #इत्यधिकम्।#
२३२ Dn3, TL1 च शक्त्यानन्त्यम् #इति नास्ति।#, Dn2 च #इति नास्ति।#
२३३ Dn2 कदञ्चित् #इत्यधिकम्।#
२३४ Dn3, Dn2 -अपि #इति नास्ति।#

[-९]ननु नान्योन्याभावप्रतियोगितावच्छेदकत्वं क्रियान्वयि द्वितीयार्थः, न वा [२३५] परसमवेतत्वं; [-१०]कर्मवाचकपदार्थतावच्छेदकावच्छिन्नान्वितद्वितीयार्थ[१०-] समवेतत्व [२३६] रूप [२३७] सामान्यधर्मावच्छिन्नतत्तत्कर्म [२३८] समवेत [२३९] स्वनिष्ठ-प्रतियोगिताकाभावात्मकस्वप्रतियोगिकाभाव [२४०] सम्बन्धेन [२४१] कर्मवाचक-पदार्थान्वितद्वितीयार्थसमवेतत्वस्य धात्वर्थ[२४२]क्रियायामन्वयस्वीकारात्।।

सामान्यरूपेण विशेषाभावानभ्युपगमेऽपि [२४३] यद्व्यक्तेः [२४४] द्वितीयार्थ[२४५]समवेतत्वेऽन्वयः, तद्व्यक्तिसमवेतत्वावच्छिन्न[२४६]प्रतियोगिकाभावा-त्मकस्वप्रतियोगिकाभावसम्बन्धेन, कर्मवाचक [२४७] पदार्थान्वितद्वितीयार्थ-समवेतत्वस्य धात्वर्थक्रियायामन्वयस्वीकारादेव[-११] न 'विहगः स्वं प्रयाती'ति

-९ Dn1 ननु..... दुर्वारत्वापत्तेः।
२३५ Dn3 चा
-१० Dn2 कर्मवाचक..... यार्थ #पर्यन्तं नास्ति।#
१०-
२३६ Dn3 -समवेतत्वत्व-
२३७ Dn3 -स्वरूप-
२३८ Dn2 तत्कर्म-
२३९ Dn3, Dn2 -समवेतत्वनिष्ठ-
२४० Dn3 -प्रतियोगितावच्छेदकाभावात्मकस्वप्रतियोगितावच्छेदकाभाव
२४१ TL1 -सन्धेन
२४२ Dn2 धात्वर्थ- #इति नास्ति।#
२४३ Dn2 अपि #इति नास्ति।#
२४४ Dn3 तद्व्यक्तेः
२४५ Dn3 द्वितीयोऽर्थ-
२४६ Dn3, Dn2 समवेतत्वत्वावच्छिन्न-
२४७ Dn3 कर्मत्वाच्च
-११ Dn2 देव न विहगः....... नान्वय #पर्यन्तं नास्ति।#

प्रयोगः ईदृश [२४८] सम्बन्धेनान्वय[११-]बोधस्य क्वाप्यदृष्टचरत्वेऽपि [२४९] प्रकृते गत्यन्तरविरहेण स्वीकारात्। अत एव च [२५०] न कर्मवाचकपदस्य तत्तद्-व्यक्तित्वेन तत्तद्व्यक्तिबोधकतया [२५१] सामान्यरूपेण बोधकतया [२५२] च युग-पद्वृत्तिद्वयविरोध इति चेन्न, नव्यनये[२५३] क्रियाया अव्याप्यवृत्तित्वेन[२५४] तन्निष्ठ-तदाश्रयद्रव्यसमवेतत्वस्यापि [२५५] अव्याप्यवृत्तित्वात् 'मल्लः स्वं[२५६] गच्छती'ति प्रयोगप्रसङ्गस्य दुर्वारत्वापत्तेः[२५७]।[९-]

[-१२]कथञ्चित् संसर्गत्वे तूक्तपर-समवेतत्वमेव सम्यक्। अन्योन्याभावस्याव्याप्यवृत्तित्वेऽप्यक्षतेः[१२-]। एतेन तत्तत्क्रियानधिकरणत्वे [२५८] सति तत्तत्क्रियावच्छेदकफलशालित्वं [२५९] तत्क्रिया-कर्मत्वम्। द्वितीयादेः [२६०] [२६१]तत्तत्क्रियानधिकरणत्वमर्थ इत्यपास्तम्। शक्त्यानन्त्यापत्तेश्च[२६२]दिक्।

---

२४८ Dn3 रसादृश
११-
२४९ Dn3 बोधस्य क्वाप्यदृष्ठगोचरत्वेऽपि, TL1 -न्वप्यद्रुष्चरत्वेऽपि
२५० Dn3. Dn2 च #इति नास्ति।#
२५१ Dn3 -बोधकतत्वतया
२५२ TL1 सामान्यरूपेण बोधकतया #इति नास्ति।#
२५३ Dn3 नव्ये नये
२५४ Dn3 अव्याप्यवृत्तितया
२५५ Dn3 -अपि #इति नास्ति।#
२५६ Dn3 स्वं #इति नास्ति।#
२५७ Dn2 दुर्वारत्वापत्तिः।
९-
-१२ Dn3, Dn2 कथञ्चित्......त्वेऽप्यक्षतेः #पर्यन्तं नास्ति।#
१२-
२५८ TL1 तत्तक्रियाधिकरणत्वे, Dn3 तुत्तत्क्रियानधिकरणत्वे, Dn1 क्रियाधिकरणत्वे
२५९ TL1, Dn2 -शालित्वं तत्तत्क्रिया, Dn3 -शालि तत्तत्क्रिया

-१३यत्तु क्रियान्वयिपरसमवेतत्वमवेक्ष्य कर्त्रन्वयि परत्वमेव लाघवात्कर्मप्रत्ययार्थ इति। तन्न, द्वितीयार्थ [२६३] फलपरसमवेतत्वयोरेकान्वयित्वे [२६४] लाघवात्। 'ग्रामो गमेः कर्म न तु चैत्र' इत्यादौ परसमवेतक्रियाजन्यत्वघटितस्यैव कर्मपदार्थतया तस्यैव कर्मप्रत्ययार्थत्वात्। 'गम्यते ग्रामः स्वयमेव' इत्यादौ परत्वान्वयिविरहाच्चेति दिक्१३- ।।

अथैवमपि पतेरधः [२६५] संयोगावच्छिन्नस्पन्दार्थकतया धात्वर्थतावच्छेदकफलशालिनो[२६६] भूतलादेः कर्मत्वे[२६७] 'वृक्षात् पर्णं भूतलं पतती'ति प्रयोगः स्यादिति चेत्[२६८] तथाविवक्षायां भवत्येव।

-१४अत एव "द्वितीयाश्रितातीते"ति [xxii] सूत्रे पतितशब्द१४-योगे द्वितीयासमासविधानं तदुदाहरणं च नरकं पतितो नरकपतित इति साधु

---

२६० Dn1 द्वितीयादिरपि
२६१ Dn1 तत्क्रिया-
२६२ Dn1 अनन्तशक्त्यापत्तेरिति
-१३ Dn1 यत्तु....च्चेति दिक् #इति नास्ति।#
२६३ TL1 द्वितीयोऽर्थ-
२६४ Dn3, Dn2 -रेकान्वयित्वेन
१३-
२६५ Dn1 यतेरधः
२६६ Dn1 -फलिनो
२६७ Dn1 कर्मत्वे #इत्यावर्तनं#
२६८ TL1 चेन्न
-१४ Dn1 द्वितीया श्रितातीतपतितेत्यादिसूत्रेण पतति शब्दे, Dn3 अत एव द्वितीयाश्रितातीतसूत्रे पतितशब्द-, Dn2 अत एव द्वितीयाश्रित इति सूत्रे पतितशब्द-
१४-

संगच्छते। क्वचित् सप्तम्यपि साधु। यथा [२६९] भूमौ पतति ग्रामे गच्छतीत्यादौ[२७०] ।।

परे तु भूतलादेः कर्मत्वेऽपि न द्वितीया। यत्र फलसम्बन्ध्याकांक्षा[२७१] तत्रैव तत्स्वीकारात्।[xxiii] [-१५]अत्र तु फलस्य अधोदेशवृत्तितया उपस्थितत्वेन न[१५-] सम्बन्ध्याकांक्षा। यद्वा कर्तृभिन्नान्वयिफलावच्छिन्नव्यापारबोधकस्यैव [२७२] धातोः सकर्मकत्वम्। यथा गम्यादेः[२७३] न तु पतेः[२७४]। अधःसंयोग[-१६]फलस्य पर्णान्वितत्वात् अध इत्यस्य[१६-] सम्बन्धिसाकांक्षतया सम्बन्धित्वेन पर्णस्यैवान्वयात्। 'भूतलं हि[२७५] [-१७]पर्णस्याधः न तु पर्णं भूतलस्येति न तु भूतलं पतती'ति[१७-] प्रयोगः।

---

२६९ Dn1 यथा #इति नास्ति।#

२७० TL1, Dn3 गच्छतीत्यादि, Dn1 गच्छतीतिवत्

२७१Dn3 फलस्य सम्बन्धाकांक्षा, Dn2 फलस्य सम्बन्ध्याकांक्षा

-१५ TL1 यत्र फलस्याद्धोद्देशवृत्तितयोपस्थितेर्न, Dn3 अत्र तु फलस्याधोदेशवृत्तितयोपस्थिते न, Dn1 अत्र फलस्य धात्वर्थतयो परिच्छेतेर्न

१५-

२७२ Dn2 -एव #इति नास्ति।#

२७३ Dn2 यथा गम्यादेः #इति नास्ति।#

२७४ TL1 पतः, Dn2 पततः

-१६ TL1 रूपफलस्य पर्णान्वितत्वात् अथ इत्यस्य, Dn3 रूपस्य पर्णान्वितत्वात्।। अध इत्यस्य, Dn1 रूपफलस्य फलान्वयित्वात् तस्य

१६-

२७५ Dn2 हि #इति नास्ति।#

-१७ TL1 पर्णस्याधो न तु भूतलस्येति न तु भूतलं पततीति, Dn3 पर्णस्यैवाधो न तु भूतलस्येति न भूतलं पततीति, Dn2 पर्णस्याधारो न पतनस्येति न भूतलं पततीति

१७-

[-१८]अथ [२७६] कथं वृक्षात्पर्णमधः [२७७] पततीति [२७८] चेत्, भ्रमात् अत्यधो [२७९] विवक्षयां [२८०] वा।। “गतं तिरश्चीनमनूरुसारथे” [xxiv] रित्यत्र व्यक्तिविशेषस्याधो[२८१]धाम[२८२]पततीत्यर्थात् न दोष[१८-] इत्याहुः।

यत्तु त्यजि [२८३] गम्यादेः स्पन्दाद्यात्मकव्यापारमात्रे शक्तिः। फलस्य द्वितीयादिलभ्यत्वात्। [२८४] अत [२८५] एव ग्रामं गच्छति, त्यजतीत्यनयोः नैकार्थता[२८६] । त्यजि[२८७]गम्योर्योगे द्वितीयादिना[२८८] विभागसंयोगयोर्बोधनात्। त्यजेर्विभागावच्छिन्न[-१९]शाब्दत्वस्य [२८९] गमेः [२९०] संयोगावच्छिन्नस्पन्द [२९१] -

---

-१८ Dn1 अथ..... दोष #पर्यन्तं नास्ति।#
२७६ TL1 इति
२७७ Dn2 -पर्णमधः
२७८ Dn2 प्रयोग #इति इत्यधिकम्।#
२७९ Dn2 अयं, TL1 पतत्यधो
२८० TL1, Dn2 विवक्षया
२८१ Dn2 विशेषस्यादौ
२८२ Dn3 धाम- #इति नास्ति।#
१८-
२८३ Dn1 त्यजि #इति नास्ति।#, Dn2 त्यज
२८४ Dn3 द्वितीया लक्ष्यत्वात्।, Dn2 द्वितीयालभ्यत्वात्।
२८५ TL1 अत एव #इति नास्ति।#
२८६ Dn1 नैकार्थत्वम्
२८७ Dn1 त्यज-
२८८ Dn1 द्वितीयेत्यादिना
-१९ Dn1 -स्पन्दशब्दत्वस्य
२८९ Dn2 -शब्दत्वस्य
२९० TL1 गम
२९१ Dn3 -स्पन्द- #इति नास्ति।#

शाब्दत्वस्य[२९२] च[१९-] कार्यतावच्छेदकत्वात्। अत एव गमनं त्याग इत्येतयोरपि नैकार्थता।[२९३] उक्तकार्यकारणभावानुरोधेनापि अत्र[२९४] [त्यजि[२९५]] गम्योर्विभाग-संयोगावच्छिन्नस्पन्दे लक्षणाङ्गीकारात्[२९६] । विभागाद्यवच्छिन्नस्पन्दशाब्दत्वं च विभागस्पन्दोभयवैशिष्ट्या[२९७]वगाहिशाब्दत्वम्। इत्थं च[२९८] चैत्रेण ग्रामः त्यज्यत इत्यादि वाक्य [२९९] जन्यस्पन्दविशेषणकविभागादिविशे [३००] ष्यक-शाब्दबोध[३०१]संग्रहः।।

इत्थं च परसमवेततत्तद्धात्वर्थान्व [३०२] यिफलविशेषशालित्वं तत्तद्धात्वर्थकर्मत्वम्[३०३] । तेन त्यजेर्नो[३०४]त्तरदेशादौ कर्मत्वमस्तीति[३०५]। तन्न। विभागाद्यवच्छिन्न [३०६] स्पन्दशाब्दत्वस्य जन्यतावच्छेदकत्वे तादृशस्पन्दे

---

२९२ Dn2 -शब्दत्वस्य

१९-

२९३ TL1 त्यागेत्यनयोर्नैकार्थता, Dn1 त्यागेत्यनयोर्नैकार्थकत्वम्।, Dn2 त्यागेत्यनयोरपि नैकार्थकत्वम्।

२९४ Dn1 अत्र #इति नास्ति।#

२९५ Dn1 त्यज-

२९६ Dn1 लक्षणास्वीकारात्

२९७ TL1 विभागस्पन्दोभयवैशिष्ठ्य-, Dn3 विभागादि स्पन्दोभयविशिष्टा-

२९८ Dn2,Dn3,TL1 तेन

२९९ Dn1,Dn3,TL1 वाक्य- #इति नास्ति।#

३०० TL1 -विशेषणक-

३०१ Dn3 -शाब्दोभय-, Dn2 -शब्दत्वं

३०२ Dn2 -र्थान्वित-

३०३ Dn3 -त्वर्थकर्मत्वत्वम्, Dn1 -त्वर्थकत्वं कर्मत्वम्

३०४ Dn3, Dn2 त्यजादेर्नोत्तर-

३०५ Dn1,Dn2 कर्मत्वमिति

३०६ Dn1,Dn3 विभागावच्छिन्न-

शक्तेर्दुर्वारत्वात्। परेषामितरान्विते शक्तिग्रहे -२०इतरांशवत् विभागाद्यंशस्य त्यागस्तु न युक्तः२०-। -२१त्यागगमनयोरेकार्थतावारणाय तत्फलविशिष्टे स्पन्दे शक्तिसिद्धे२१- विनापि लक्षणाप्रतिसंधानं[३०७] तथाप्रतीतेरिति दिक्।

[३०८] एवं ददातेर्मूल्यग्रहणं विना स्वस्वत्वध्वंसपरस्वत्वजनकत्यागः, यजतेः देवतोद्देश्यकस्वस्वत्वध्वंसफलकत्यागः [३०९] जुहोतेस्तादृशाग्नि-प्रक्षेपोऽर्थः[३१०]। * अत एव ऋत्विजां तादृशत्यागाभावेऽपि होतृत्वम्। अग्नि-प्रक्षे**पश्चाग्निसंयोगानु-२२कूलक्रियानुकूलघृतादिवृत्ति नोदनादि२२-व्यापारः[xxv]। न चैवमग्नौ जुहोतीत्यादौ सप्तम्यर्थस्याग्निसंयोगेऽन्वये निराकांक्षतेति [३११]

-२० Dn1 इतर शब्दवत् विभागाद्यव्यत्यागास्तत्र युक्तः, Dn2 इतरांशवद्विभागाद्यंशस्य त्यागो न
२०-

-२१ TL1 त्यागगमनयोरेकार्थतावारणाय तत्फलविशिष्ठस्पन्दे शक्तिसिद्धिः, Dn3 त्यागगत्योरेकार्थतावारणाय तत्फलविशिष्ठ स्पन्दशक्तिं सिद्धेः, Dn2 त्यागगत्योरेकाभावारणायात्र त्यागे विशिष्ठस्पन्दे शक्तिं
२१-

३०७ Dn2 तल्लक्षणानुसंधान-

३०८ Dn2 एवं #इति नास्ति।#

३०९ Dn1 -फलकत्यागः, Dn3 परस्वत्वं जनकस्यागो पजतेर्देवतोद्देश्यकस्वस्वत्वध्वंसकत्यागः।, Dn2 परस्वत्वजनकत्यागः यजतेर्देवतोद्देश्यकस्वस्वत्वध्वंसफलकत्यागः।

३१० Dn1 -प्रक्षेपः, Dn3 -प्रक्षेपोरर्थः, Dn2 -प्रक्षेपश्चार्थः

* तादृशत्वं च देवतोद्देश्यकत्वम्। #इदं वाक्यं व्याख्यातृ प्रक्षेपः। TL1, Dn3, Dn2 मद्धे नास्ति।#

** यजतेर्देवतोद्देश्यकस्वस्वत्वध्वंसफलकत्यागः। #इति व्याख्यातृ प्रक्षेपः। Dn1#

-२२ TL1 -कूलक्रियानुकूलघृदादिवृत्तिमोदना, Dn3 -कूलक्रियानुकूलघृदादिवृत्तिनोदनादि, Dn1 -हवादिवृत्तिमोदनादि
२२-

३११ TL1 -संयोगेनान्वये निराकांक्ष इति

वाच्यम्। अत्र संयोगानुकूलक्रियानुकूलव्यापारस्यैव धात्वर्थत्वात्[३१२] । न च[३१३] तथाप्यग्नेः कर्मतापत्तिः[३१४]। संयोगस्य[३१५] (धात्वर्थानवच्छेदकतया) तद्वतोऽग्नेः कर्मत्वाभावात्। क्रियाया एव धात्वर्थतावच्छेदकतया तच्छालीनो घृतस्यैव कर्मत्वात्[३१६] ।[xxvi]

इत्थं च 'विप्राय गां ददाति', 'विष्णुं यजते' 'घृतं जुहोती'त्यादौ मूल्यग्रहणं विना[३१७] [xxvii] विप्रोद्देश्यकगोवृत्तिस्वस्वत्वध्वंस[-२३]परस्वत्वजनक[२३-] त्यागानुकूलकृतिमान्, विष्णु[३१८] उद्देश्यकस्वस्वत्वध्वंसफलक[३१९] -त्यागानुकूलकृतिमान्, [३२०]घृतवृत्यग्निसंयोगावच्छिन्नक्रियानुकूलव्यापारानुकूल-कृतिमानित्यन्वयबोधः। *एवं[३२१] मूल्यग्रहणप्रयुक्तस्वस्वत्वध्वंसपरस्वत्व-

---

३१२ Dn1 -व्यापारस्येव धात्वर्थत्वात्, Dn2 -व्यापारस्येव धात्वर्थात्
३१३ Dn1 तच्च
३१४ Dn3, Dn2 कर्मत्वापत्तिः
३१५ TL1 धात्वर्थतावच्छेदकतया, Dn1 धात्वर्थतावच्छेदकतादकतया, Dn2 धात्वर्थतावच्छेदकतावच्छेदकतया
३१६ Dn2 द्वितीयार्थश्च वृत्तित्वं तच्च धात्वर्थावच्छेदके अन्वेति। #इत्यधिकम्।#
३१७ Dn1 मूल्यग्रहणं विना #इति नास्ति।#, Dn3 मूल्यग्रहण-
-२३ TL1, Dn3 -फलक-
२३-
३१८ TL1 विष्ण-, Dn1 घृतवृत्यग्निसंयोगावच्छिन्न- , Dn2 [इत्यन्वर्थ बोधः विष्णोरुद्देश्यत्वसम्बन्धेन स्वस्वत्वध्वंसफलवत्वात्कर्मत्वम्। #इति Dn2 मद्धे व्याख्यातृ प्रक्षेपः।#] विष्णु
३१९ Dn1 -फल-
३२० Dn2 इत्यन्वय बोधः। #इत्यधिकम्।#
* विष्णोरुद्देश्यतासम्बन्धेन स्वस्वत्वध्वंसरूपफलवत्वाफलवत्वात्कर्मत्वम्।#इदं वाक्यं व्याख्यातृ प्रक्षेपः। #
३२१ Dn1 च #इत्यधिकम्।#

जनकत्यागो[३२२] विक्रयः[३२३]। मूल्यदानप्रयुक्तस्वस्वत्वोत्पादक[३२४]स्वीकारः क्रयः। [दत्तद्रव्यस्य स्वस्वत्वजनक[३२५]]स्वीकारः प्रतिग्रहः[३२६]। तथा च[३२७] 'गां विक्रीणाति प्रतिगृह्णाती'त्यादौ[३२८] गोवृत्तिमूल्यग्रहण[३२९]प्रयुक्तस्वस्वत्वध्वंसपर-स्वत्वानुकूलत्यागानुकूल[३३०]कृतिमान्, गोवृत्ति[-२४]मूल्यदानप्रयुक्तस्वत्वानुकूल[३३१]-स्वीकारानुकूलकृतिमान्,[-२५] गोवृत्ति[२४-]दत्तद्रव्यस्वस्वत्वजनक[३३२]स्वीकारानुकूल-कृतिमा[२५-]निति क्रमेणान्वयधीरिति संप्रदायः।

इदमत्रावधेयम्[३३३]। दानस्य [-२६]परस्वत्वजनकत्वेन तत एव विक्रय[२६-] वारणे मूल्यग्रहणं[३३४] विनेति व्यर्थम्। अथ प्रतिग्रह एव स्वीकारविशेषतया

---

३२२ Dn2 -स्वस्वत्वध्वंसफलकत्यागो, Dn3 -स्वस्वत्व-उत्पादकस्वीकारः

३२३ Dn1 विक्रियः, Dn3 क्रयः, Dn2 विक्रयः

३२४ Dn1 स्वतोत्पादन-, Dn2 स्वत्वोत्पादक -

३२५ TL1, Dn3 दत्तद्रव्यस्वस्वत्वजनक-, Dn2 दत्तद्रव्यस्वस्यस्वत्वं जनक- , Dn1 दलद्रव्यस्वत्वं स्वत्वजनक-

३२६ Dn3, Dn2 परिग्रहः

३२७ Dn1 तथा च #इति नास्ति।#

३२८ Dn1 प्रतिग्रहातीत्यदौ, Dn3 क्रीणाति, Dn2 गां क्रीणाति गां प्रतिगृह्णातीत्यादौ

३२९ Dn3 ग्रहे

३३० Dn3 स्वस्वत्वानुकूलत्यागानुकूल-, Dn2 स्वस्वत्वध्वंसफलकत्यागानुकूल-

-२४ Dn3 -मूल्यदान......गो वृत्ति- #पर्यन्तं नास्ति।#

३३१ Dn2 -स्वस्वत्वानुकूल-

-२५ Dn2 गोवृत्ति.....कृतिमा- #पर्यन्तं नास्ति।#

२४-

३३२ Dn1 -द्रवद्रव्यास्वत्वजनक-, Dn3 -दत्तद्रव्यत्वजनक-

२५-

३३३ Dn1 इदमत्र बोध्यम्, Dn3 इदमत्रवावधेयं, Dn2 इदमत्राभिधेयं

-२६ TL1 परस्वत्वजनकत्वेति तयेव विक्रय, Dn3 परस्वत्वे न तत एव क्रय, Dn2 परस्वत्वजनकत्वे न तत एव विक्रियादि

स्वत्व[३३५] हेतुः; अस्वामिके स्वीकारस्य स्वत्व[३३६] हेतुत्वकल्पनात्। अत एव "याजनाध्यापन[३३७] प्रतिग्रहैर्ब्राह्मणो धनमर्जये[३३८] दि"त्या[३३९] दिकं साधु सङ्गच्छते। अन्यथा प्रतिग्रहवैफल्यापत्तेः[३४०]। दानं तु स्वस्वत्वध्वंसमात्रं जनयत्परस्वत्व[३४१] प्रयोजकमिति मतम्। तथापि पूर्वोक्तलक्षणमसम्यक् (तद्वैय्यर्थ्यं)[३४२] तदुपादानेप्युपेक्षायामिति अतिव्याप्तेः[३४३]। तस्या अपि स्वस्वत्वध्वंसद्वारा [xxviii] परस्वत्वप्रयोजकत्वात्। [-२७]तद्वारणाय दाने[३४४] वैजात्योपादानस्यावश्यकत्वात्[२७-]।

वस्तुतो दूरस्थपात्रमुद्दिश्य त्यक्तस्य द्रव्यस्य[३४५] प्रतिग्रहात् प्रागस्वामिकस्यानुद्देश्येन[३४६] पुरुषेण स्वीकारे[३४७] प्रतिग्रहात्स्वत्वं[३४८] स्यात्।

२६-
३३४ TL1, Dn3 वारणमूल्यग्रहणं, Dn1 वारणे मूल्य-हणं (अक्षरलोपः)
३३५ TL1 स्वस्वत्व-, Dn3 स्वत्वे
३३६ TL1 स्वस्वत्वहेतुत्व-, Dn2 स्वत्वहेतुत्वा-
३३७ TL1 याजनाध्यापन-, Dn3 याजनाध्ययन-, Dn1 याजनाध्यन-
३३८ Dn1,Dn3,TL1 धनमार्जयेत्
३३९ Dn3 'इत्यादिकं' #इति नास्ति।#
३४० TL1 -वैफल्यापत्तेः।, Dn3 -वैकल्यापत्तेः।, Dn2 -वैकल्पापत्तेः
३४१ TL1, Dn3 जनयत्परस्वत्व-, Dn1 जनयेत्परस्वत्व-
३४२ TL1 तथा च पूर्वोक्तलक्षणमन्यत्, Dn1 'तथापि तद्वैय्यर्थ्यं' एतदपि सम्यक् इव भाति।
३४३ Dn1,Dn2 व्याप्तिः
-२७ Dn3 तद्वारणाय......श्यकत्वात् #पर्यन्तं नास्ति।#
३४४ TL1 त्यागे, Dn2 दाने #इति नास्ति।#
२७-
३४५ Dn1 त्यक्तद्रव्यस्य
३४६ Dn1 प्रागस्वामिकस्यकस्यानुद्देश्येन, Dn2 प्रागस्वामिकस्यानुकूलोद्देश्येन
३४७ TL1, Dn3, Dn2 स्वीकारे #इति नास्ति।#

अन्योद्देश्यक[३४९]त्यागादेः प्रतिबन्धकत्वे तु[३५०] गौरवम्। न च [-२८]तादृशत्यागो दानाभास एव। ससंप्रदानको[२८-] हि त्यागो दानम्। संप्रदानं च [३५१] ददस्वे[३५२]त्यनुमतिप्रकाशनद्वारा दान[३५३]क्रियाहेतुत्वेन[३५४], न[३५५] चासन्निहितस्य तत्वमिति[३५६] न ततो [-२९]दातुः स्वत्वनाश इति वाच्यम्[२९-]।

तीर्थे संकल्पितं [-३०]द्रव्यं यदन्यत्र[३०-] प्रदीयते ।

दाता तीर्थ[३५७]फलं भुङ्क्ते[३५८] प्रतिग्राही[३५९] न दोषभाक्।।

मनसा पात्रमुद्दिश्य [-३१]भूमौ तोयं विनिक्षिपेत्[३१-]।

विद्यते सागरस्यांतो दानस्यांतो न विद्यते।।

---

३४८ Dn2 प्रतिग्रहात्स्वत्वं स्यादिति

३४९ Dn2 -द्देश्यकत्वादेः

३५० TL1, Dn1,Dn3 तु #इति नास्ति।#

-२८ Dn1 तादृशो गोदानाभासप्रसरः। प्रदानो, Dn3, Dn2 तादृशत्यागोदानाभाव एव। ससंप्रदानको

२८-

३५१ Dn1 च #इति नास्ति।#

३५२ Dn3 ददस्वेत्याद्यनुमिति-

३५३ Dn1 दान- #इति नास्ति।#

३५४ TL1, Dn3 हेतुः

३५५ Dn1 न #इति नास्ति।#

३५६ Dn1 न तदिति

२९-

-३० Dn3 द्रव्यं तदन्यत्र, Dn2 यद्यत्तदन्यत्र द्रव्यं #इति नास्ति।#

३०-

३५७ Dn3 तीर्थे

३५८ TL1 भुक्ते

३५९ TL1 प्रतिग्राहे

-३१ TL1 जलमध्ये जलं क्षिपेत्

३१-

इत्यादिवाक्यात् तादृशस्य दानत्वसिद्धेः। xxix तस्माद्दानमेव पर[३६०] स्वत्वजनकं प्रतिग्रहप्रागभावस्यापेक्षणीयत्वान्न[३६१] प्रतिग्रहवैफल्यम्[३६२]। अत एव यस्मै दत्तं[३६३] तस्या[३६४]प्रतिग्रहेण[३६५] दातुः स्वत्वनिवृत्तिः। अस्तु वा दत्त[३६६] द्रव्यस्वीकारत्वरूपप्रतिग्रहत्वेन स्वीकर्तव्यद्रव्यदानत्वेन[३६७] वेति[३६८] त्यत्र विनिगमकाभावाद्दानं स्वस्व[३६९] त्वध्वंसद्वारा[-३२]परस्वत्वजनकं; प्रतिग्रहश्च स्वस्वत्वजनकः[३२-]। उभयथापि मूल्यग्रहणं विनेति व्यर्थम्। [विक्रयस्य[३७०]] परस्वत्वजनकत्वे[३७१] मानाभावात्। न च विक्रीतद्रव्यस्वी[-३३-३४]स्वीकारत्वरूपक्रयत्वेन स्वीकर्तव्यद्रव्यविक्रयत्वेन वा क्रयत्वमित्यत्रापि[३४-]

---

३६० Dn1,Dn3,TL1 पर #इति नास्ति।#

३६१ TL1 प्रतिग्रहस्यापेक्षणीयत्वान्न, Dn3, Dn2 प्रतिग्राहप्रागभावस्यापेक्षणीयत्वान्न

३६२ Dn3 -वैकल्यम्

३६३ TL1, Dn3, Dn2 एव यस्मैदत्तं

३६४ Dn3 तस्य, Dn1 तेन

३६५ Dn3 प्रतिग्रहे न

३६६ Dn1 दत्त- #इति नास्ति।#

३६७ Dn3 स्वीकर्तव्यदानत्वेन, Dn1 स्वीकर्तृद्रव्यदानत्वेन

३६८ Dn1 चेति

३६९ Dn3 स्वत्वध्वंस-

-३२ TL1 प्रतिगृहश्च स्वस्वत्वजनकः, Dn3 -परस्वत्वजनकं प्रतिग्रहश्च साक्षात्स्वजनकं, Dn1 प्रतिग्रहश्च स्वत्वजनकं

३२-

३७० TL1 विक्रियस्य #इति नास्ति।#, Dn1 विक्रियस्य

३७१ TL1 स्वस्वत्वजनकत्वे, Dn1 स्वत्वजनकत्वे

-३३ Dn1 -कारत्वत्रयत्वमित्यत्रापि व्यर्थम्।

-३४ TL1 स्वीकारत्वं क्रयमित्यत्रापि, Dn3 स्वीकारत्वं क्रयत्वमित्यत्रापि

३४-

विनिगमनाविरहः[३७२]। मूल्यदानपूर्वकस्वीकारस्यैव[३७३] क्रयत्वात्। विक्रयत्वस्य गौरवेणानिवेशात्[३७४]। किं च स्वस्वत्वध्वंसजनकेत्यपि व्यर्थम्[३३-]। अव्यावर्तकत्वात्।

अपि चाग्निप्रक्षेपो होम इत्यप्ययुक्तम्[३७५]। "देवतोद्देश्यक[३७६]-स्वस्वत्वध्वंसफलकस्त्यागो यागः। स एव प्रक्षेपावच्छिन्नो[३७७] होम"[xxx -३५]इति वाचस्पतिमिश्राद्युक्तेः। "याग[३५-] एव विशिष्ट[३७८]देश प्रक्षेपोपहितो[३७९] होम" इति विवेकोक्तेश्च[३८०]। अस्तु च ऋत्विजां त्यागाद्यजमानस्य[३८१]स्वत्वध्वंसः। अनुमतदासत्यागाद्दूरदेशस्थ[३८२]स्वामिस्वत्व[३८३]ध्वंसवत्।।

---

३७२ TL1,Dn3 विनिगमनविरहः
३७३ TL1,Dn3 -स्वीकारत्वस्यैव
३७४ TL1,Dn3 गौरवेण निवेशात्
३३-
३७५ TL1 इत्ययुक्तम्, Dn1 इत्युक्तम्
३७६ Dn1 -त्यागो #इत्यधिकम्।#
३७७ Dn1 प्रक्षेपावच्छिन्न-
-३५ TL1 इति वाचस्पतिमिश्राद्युक्तिः। याग, Dn3 इत्युच्यते वाचस्पतिमिश्रैः त्याग, Dn1 इति वाचस्पतिमिश्राप्युक्तः याग
३५-
३७८ TL1 विशिष्ठ विशिष्ठ #इति द्वित्वम्।#
३७९ Dn1 देशे प्रक्षेपोपहितो
380 Dn3 विवेकोक्तेः
३८१ TL1 त्यागाद्यजमानस्वत्व-, Dn1 त्यागद्य--मानस्य- स्वत्व- (अक्षरलोपः), Dn2 त्यागाद्यनुमानस्य स्वस्वत्व-
३८२ TL1 अनुमतदानत्यागाद्विशेषदेशस्थ-, Dn1 अनुमतदायः नावदेः त्यागदिदेश-, Dn2 सोऽनुमतः देशत्यागाद्विदेशस्थ-
३८३ TL1 स्वामिस्वस्वत्व-, Dn3 स्वामीस्वत्व-, Dn2 स्वामीस्वस्वत्व-

वस्तुतस्तु[३८४] दानत्वयाग[३८५]त्वहोमत्वादयो मानसप्रत्यक्षगम्याः[३८६] जातिविशेषाः। न च 'श्राद्धस्य पित्रपेक्षया यागत्वं ब्राह्मणापेक्षया दानत्व'मिति [३८७]विवेकोक्तेः, तयोः सांकर्यान्न[३८८] जातित्वमिति[३८९] वाच्यम्। श्राद्धस्य गौणं तद् उभयरूपत्वात्*। वस्तुतः श्राद्धस्य यागत्वमेवोद्देश्यपित्रादिस्वत्वाजनकत्वात्[३९०]। ब्राह्मणस्य स्वत्वमपि न सार्वत्रिकम्। ब्राह्मणाभावेऽपि[३९१] श्राद्धोक्तेः। "पिण्डास्तु गोऽजविप्रेभ्य"[३९२] इत्यादिना अन्यत्रापि [३९३]तत्प्रतिपत्तेः।

'विष्णुं यजते'[३९४] इत्यादौ द्वितीयार्थोऽप्युद्देश्यत्वम्। तत्वं[३९५] च तस्येदम् इत्यारोपज्ञान[३९६] विषयत्वम्। देवतायाः स्वत्वोपगमे तु यागत्वं

---

३८४ TL1 -ध्वंसवतः।। वस्तुतो दानत्व-, Dn3 -ध्वंसवत्।। वस्तुतोपादानत्व-, Dn1 -ध्वंसवतः वस्तुतो दानत्व-

३८५ Dn3 -त्यागत्वहोमत्व-,

३८६ TL1 -गम्या

३८७ Dn3 -मितिरिवोक्तः

३८८ Dn1 सांकर्यमिति

३८९ Dn1 - -तित्वमिति (अक्षरलोपः)

* गौणतयोभयरुपत्वात् इति भाव्यमिति भाति। वैकल्पिकः पाठोऽयम्।

३९० TL1 त्यागत्वमेवोद्देश्यपित्रादि स्वत्वाजनकत्वात्, Dn1 त्यागत्वमेवोद्देश्यापि आदिरचरत्वजनकत्वात्, Dn2 यागत्वमेवोद्देश्च पित्रादि स्वत्वाजनकत्वात्

३९१ Dn1 ब्राह्मणासंभवेऽपि

३९२ Dn1 गोविप्रजलविप्रजलविप्रेभ्य

३९३ Dn2 तत् #इति नास्ति।#

३९४ Dn3 जपत, TL1 यजेते

३९५ Dn1 तत्वं #इति नास्ति।#

३९६ Dn1 इत्यादौ रूपज्ञान-, Dn2 इत्यादिज्ञान-

दानत्व[-३६]व्याप्यं होमत्वं यागत्वव्याप्यमिति सिद्धम्।[३६-] देवपूजादिकमपि याग एवेत्यलमप्रकृतविचारेणेति[३९७]।।

अत [३९८] एव [स्वपरस्वामिकत्व] संसृष्टिस्थलेऽसाधारण [३९९] -स्वत्वनाशोत्तरं साधारणस्वत्वोत्पादात्तत्र [४००] सकल [४०१] विशेषसहित [४०२] -दानलक्षणाति [४०३] व्याप्तिरित्यपास्तम् [४०४] । दानत्वजातेस्तत्राभावात्। [४०५] तत्र परमात्र [४०६] स्वत्वानुकूलत्वविशेषणात् संसृष्टिनिरास इत्यन्ये। तत्र न स्वत्वनाशः [४०७] किन्तु परस्वत्वो [४०८] त्पत्तिमात्रम्। न च स्वस्वत्ववति परस्वत्वानुपपत्तिः [४०९] । तत्रेच्छाया उत्तेजकत्वात् [४१०] ।

-३६ TL1 -व्याप्यं होमत्वं यागत्वव्याप्यमिति सर्वसिद्धं, Dn3 -व्याप्यं होमत्वं यागत्वव्याप्यमिति सर्वत्रासिद्धं, Dn1 -व्याप्यमितिसर्वसिद्धं

३६-

३९७ TL1 एवेत्यलमप्रकृतेन।।, Dn1 एवे- - -मप्रकृतविचारेण (अक्षरलोपः), Dn2 एवेति कृ म प्रकृतेन।।

३९८ Dn3 एव #इति नास्ति।#

399 TL1 -असाधारण-, Dn3 -ऽसाधारण-, Dn1 साधारण-

४०० Dn1 असाधारणसस्वपोत्पादानात्। तत्र स्वत्व-, Dn2 असाधारणस्वत्वोत्पादात्तत्र सकलत्व-

४०१ Dn3, Dn2 विशेषण

४०२ Dn2 -रहित-

४०३ Dn2 अव्याप्तिः

४०४ Dn3 -रिति परास्तम्

४०५ TL1, Dn3, Dn2 तत्र #इति नास्ति।#

४०६ Dn2 परमत्र-

४०७ Dn1 -स्वस्वत्वनाशाः न

४०८ TL1 परस्वत्वोत्पादनमात्रं

४०९ Dn1 स्वत्ववतिस्वोत्वोत्पत्ति

४१० Dn1 तत्रेच्छा जनकत्वात्, Dn3, TL1 तत्रेच्छाया उत्तेजकत्वादिति

स्वत्वध्वंसपूर्वकत्वविशेषणादेव तन्निरास इत्यन्ये। परे [४११] तु [४१२] अदृष्टविशेषणात्तद्व्यावृत्तिरित्यप्याहुः [४१३]। एतेन विनिमये विक्रय [४१४]-लक्षणातिव्याप्तिरित्यपास्तम्। विक्रयत्वादे [४१५] र्जातित्वात्। मूल्यातिरिक्त-द्रव्यादि [४१६] ग्रहणेप्रयुक्तस्वस्वत्वध्वंसपरस्वत्वानु [-३७]कूलत्यागो [४१७] [-३८]विनिमय इत्यन्ये।

किमत्र स्वत्वमिति चेत्। अत्र प्राञ्चः [४१८]। यथेष्टविनियोज्यत्वं स्वत्वम्। तच्च शास्त्रानिषिद्धविनियोगोपायः[३८-]। क्रय[विक्रय [४१९]] [४२०] प्रतिग्रहादिस्तद्विषयत्वम्। तच्च न [४२१] बहिरिन्द्रियवेद्यम् [४२२]।

---

४११ Dn1 इत्यपरे
४१२ Dn1 तु #इति नास्ति।#
४१३ TL1 -विशेषजनकत्वविशेषणात्तद्व्यावृत्तिः, Dn3 -विशेषजनकत्वविशेषणत्वान्निरास इत्याहुः।,
Dn2 -विशेषजनकत्वविशेषणात्तद्व्यावृत्तिः इत्याहुः।
४१४ TL1 विक्रयादि-, Dn3 विक्रियादि-, Dn1 क्रम-
४१५ TL1 Dn3 विक्रयात्वादे-, Dn1, क्रियात्पादे-
४१६ TL1, Dn3, Dn2 द्रव्यग्रहणे
- ३७ Dn1 -त्वानु- कूलत्यागो विनिमयः इत्यास्तामपि विस्तरेण।।, -कूलत्यागा........गौरवादित्याहुः #पर्यन्तं नास्ति।#
४१७ TL1 -त्वानुत्पादोपायः
-३८ TL1 विनिमय..... विनियोगोपायः। #पर्यन्तं नास्ति।#
४१८ Dn2 प्राचीनाः
३८-
४१९ TL1,Dn2 -विक्रयादि #इति नास्ति।#, Dn1 विक्रयादि
४२० Dn3 तद्विषयत्वम् #इत्यधिकम्।#
४२१ TL1 न #इति नास्ति।#
४२२ TL1 बोध।

प्रतिग्रहादेर्मानसज्ञानविशेषरूपस्य[४२३] बहिरिन्द्रियायोग्यत्वादित्याहुः[४२४]। नव्यास्तु प्रतिग्रहादिनाशोत्तरमपि स्वत्वव्यवहारात्; [-३९]'दानातितः स्वत्वं नश्यति'; 'प्रतिग्रहादितश्च स्वत्वमुत्पद्यत' इत्यादिप्रत्ययव्यवहार[३९-]प्रामाण्यानुरोधेन[४२५]-स्वत्वमतिरिक्तमेव[४२६] पदार्थः। [-४०]तच्च स्वत्वं दानादितो नश्यति प्रतिग्रहादितश्च जायते[४२७]। [४०-]तच्च बहिरिन्द्रिययोग्यं, स्वं पश्यामीत्यादि[४२८] प्रतीतेः। तदीययथेष्टविनियोज्यत्वज्ञानस्य [४२९] तदीयस्वत्वसाक्षात्कारहेतुत्वात्, न यथेष्टविनियोगाद्यज्ञानदशायां स्वत्वसाक्षात्कारापत्तिः।

वस्तुतस्तदीय [४३०] [-४१]यथेष्टविनियोज्यत्वे तदीय[४१-]स्वत्वव्यभिचारित्वग्रहदशायां तद्ग्रहेऽपि स्वस्वत्व[४३१]साक्षात्कारानुदयात् तदीयस्वत्व[-४२]साक्षात्कारं

---

४२३ Dn2 -विशेषस्य
४२४ Dn2 बहिरिन्द्रियायोग्यत्वात्
-३९ Dn2 दानादितः......व्यवहारात् #पर्यन्तं नास्ति।#
३९-
४२५ TL1 प्रमाणानुरोद्येत्, Dn2 प्रमाण्यानुरोधात्
४२६ Dn3 -त्वमधिरिक्त-
-४० Dn3 तच्च...... स्वत्वमुत्पद्यते #पर्यन्तं नास्ति।#
४२७ Dn1 स्वत्वमुत्पद्यते
४०-
४२८ Dn2, TL1 पश्यामीति
४२९ TL1 -विनियोज्यतत्वज्ञानस्य
४३० TL1 वस्तुतस्तु तदीय-
-४१ TL1 -यथेष्ठविनियोज्यत्वे तदीय #इति नास्ति।#
४१-
४३१ Dn2 स्वत्व-
-४२ Dn3 -साक्षात्कारं ....वाच्यम् #पर्यन्तं नास्ति।#

प्रति तदीयस्वत्वव्याप्यतदीययथेष्टविनियोज्यत्ववदिदमि[४३२]त्याकारकज्ञानस्य[४३३] हेतुत्वं वाच्यम्[४२-]। तथा च स्वत्वस्यानुमितिरेव;[४३४] न तु साक्षात्कारः। स्वत्वे लौकिकविषयताकल्पने लौकिकविषयिताशालितत्साक्षात्कारे तादृश[४३५] विशेष-दर्शनादेः[४३६] हेतुत्वकल्पने च गौरवात्।

स्वं पश्यामीत्यनुव्यवसायस्तु[४३७] 'सुरभि चन्दनं पश्यामी'त्यादिवत्[४३८] न[४३९] विशेषणांशे लौकिकविषयत्वावगाही। न[४४०] चायोग्यत्वकल्पने लौकिक[४४१]साक्षात्कारे[४४२] स्वत्वस्य प्रतिबन्धकत्व[४४३]कल्पने गौरवमिति वाच्यम्। तस्यायोग्यत्वे[४४४] लौकिकविषयतादेर्विरहादेव[४४५] तत्प्रत्यक्षादेर्वारण[४४६] संभवात्।

---

४३२ TL1 इदम् #इति नास्ति।#
४३३ TL1 तदीयस्वत्वसाक्षात्कार-
४२-
४३४ TL1 -अनुमितेरेव
४३५ Dn2 तादृग्विशेष-
४३६ D n2 -दर्शनस्य
४३७ TL1 पश्यामीत्याद्यनुव्यवसायस्तु
४३८ TL1 पश्यामीत्यादिमत्
४३९ Dn2 न #इति नास्ति।#
४४० TL1 या योग्यत्व-
४४१ TL1 लौकिके
४४२ Dn3 साक्षात्कारि
४४३ Dn2 प्रतिबन्धत्व-
४४४ Dn2, TL1 अयोग्यत्वकल्पने
४४५ Dn2, TL1 -विषयताविरहादेव
४४६ Dn2, TL1 तत्प्रत्यक्षवारण-

योग्यत्वे [४४७] तद्गोचरलौकिकप्रत्यक्षसामग्र्यास्तद्गोचरानुमित्यादौ प्रतिबन्धकत्वकल्पने[४४८] गौरवादित्याहुः[४४९] [३७-]।।

तच्च कर्म त्रिविधम्। प्राप्यं विकार्यं निर्वर्त्यम् च। तत्र संयोगादि[४५०] रूपक्रियाजन्य फलशालि प्राप्यम्। यथा 'ग्रामं गच्छती'त्यादौ ग्रामादि।। यल्लब्धसत्ताकमेवावस्थांतरम् आपद्यते तद्विकार्यम्। यथा 'काष्ठं [-४३]भस्म करोति','सुवर्णं कुण्डलं करोती'त्यादौ काष्ठादि[४३-]। काष्ठादिपदलक्ष्यस्य काष्ठावयवादेः सत एव [४५१] भस्मादि [४५२] सम्बन्धरूपावस्थांतरप्राप्तिः।।

यत्तु क्रिया यत्कर्मनाशकं फलं जनयति तद्विकार्यम्। यथा[४५३] काष्ठं लुनातीत्यत्र काष्ठमिति तन्न। काष्ठपदलक्ष्यस्य काष्ठावयवस्य कर्मतया क्रियायास्त[४५४]न्नाशकत्वाभावात्।। अत्र हि[४५५] काष्ठपदस्य काष्ठावयवो [४४-]

---

४४७ TL1 योग्यत्वेन
४४८ Dn2 प्रतिबन्धकत्वकल्पने #इति नास्ति।#
४४९ Dn3 गौरवाध्येत्याहुः
३७-
४५० Dn2 -रूप- #इति नास्ति।#
-४३ Dn1 भस्मीकरोतीत्यादौ काष्ठं , Dn3 भस्मीकरोति सुवर्णं कुण्डलं करोतीत्यादौ काष्ठादि, Dn2 भस्मकरोति, सुवर्णं कुण्डलं करोतीत्यादौ काष्ठं काष्ठादि
४३-
४५१ Dn1 स्वत
४५२ Dn1 -रूप- #इत्यधिकम्।#
४५३ Dn1 यथा #इति नास्ति।#
४५४ Dn3 क्रियायास्तत्राशक्तत्वाभावात्, Dn2क्रियायास्तन्नाशकत्वासंभावात्
४५५ Dn2 हि #इति नास्ति।#

लुनातेरारम्भकसंयोगप्रतिद्वन्द्विविभागहेतुक्रियानुकूलः[४५६] कुठारादिव्यापारोऽर्थः। तथा च काष्ठावयव[-४५]वृत्त्यारम्भकसंयोगप्रतिद्वन्द्विभागजनकक्रियानुकूल[४५-] व्यापारानुकूलकृतिमानित्यन्वयधीः [४५७] ।। काष्ठावयवस्य प्राप्यकर्मतैव; अवस्थान्तरप्राप्त्यभावान्न विकार्यता [४५८] ।। तण्डुलं पचतीत्यादौ तण्डुलपदलक्ष्यस्तण्डुलावयवः [४५९] , पच्यर्थो [४६०] रूपादिपरावृत्त्यवच्छिन्नो विक्लृत्यवच्छिन्नो वा[४६१] [४४-] तेजःसंयोगः।

तथा [४६२] च धात्वर्थजन्यफलशालित्वात्सतोऽवस्थांतर [४६३] प्राप्ते [४६४] -श्चोभयविधं कर्मत्वं तण्डुलावयवस्य[४६५] इत्यसंकीर्णस्थान[४६६]मुक्तमेवेत्यदोषः।।

४४- Dn1 लुनातीत्यत्र काष्ठमिति।। तन्न।। काष्ठपदलक्ष्यस्य काष्ठावयव वृत्ति तादृशविभागावच्छिन्न व्यापारानुकूल वृत्तिमानित्यन्वयधीः।। काष्ठावयव स्वप्राप्य कर्मणोप्यवस्थान्तर प्राप्त्यभावान्न विकार्यता।। ओदनं पचतीत्यादौ ओदनपदलक्ष्य ओदनावयवः रूपादिपरावृत्त्यवच्छिन्न तादृशविभागहेतुक्रियाजनक

४५६ Dn3 -प्रतिद्वन्द्विभागानुक्रियानुकूलः कुठारादि, Dn2 -प्रतिद्वन्द्विभागानुकूलक्रिया

-४५ Dn3. Dn2 -वृत्तितादृशविभागहेतुक्रियाजनक-

४५-

४५७ Dn2,Dn3 इति #इत्यधिकम्।#

४५८ Dn3 विकार्यः

४५९ TL1 तण्डुलपदलक्ष्यतण्डुलावयवः, Dn3 तण्डुलपदस्य लक्ष्यतण्डुलावयवः

४६० TL1 पच्यतो

४६१ Dn2 वा #इति नास्ति।#

४४-

४६२ Dn3 च #इति नास्ति।#

४६३ TL1 -तर- #इति नास्ति।#

४६४ Dn3 -प्राप्तेश्चोभय-

४६५ Dn1 कर्मत्वमोदनावयवस्ये

४६६ Dn1 स्थल

यत्क्रियया निष्पद्यते[४६७] तन्निर्वर्त्यम्[४६८]। यथा घटं कटं वा[४६९] करोतीत्यादौ घटादि[४७०]।। अत्र कृञः फलावच्छिन्नव्यापारा[४७१] बोधकतया (व्यापार-बोधकत्वाभावाद्) गौणकर्मत्वम्। तच्च साधनाख्य[४७२]कृतिविषयत्वम्। अत एव 'वीरणं करोती'त्यादिः न प्रयोगः।। [४७३] वीरणादावुपादानताख्य[४७४]-कृतिविषयताया एव सत्वात्।

यत्तु [-४६]कटादिपदस्य कटाद्यवयवे वीरणादौ निरूढ[४६-]लक्षणा। तत्र विना लक्षणां[४७५] कटादे[४७६] गौणकर्मत्वसंभवेऽपि कारकत्वासंभवात्, निरूढ[४७७] लक्षणायाः मुख्यप्रयोगापवादकत्वाच्च[४७८] न[४७९] वीरणं करोतीति मुख्यप्रयोग इति। तन्न। 'अतीतं घटं जानाती'[४८०]त्यादौ घटादेरिव कटादेरपि

---

४६७ Dn1 नित्यघटते

४६८ Dn3 निवर्त्यः,Dn1 निवर्त्यम्

४६९ Dn1 कटं वा #इति नास्ति।#

४७० Dn3 कटादि

४७१ Dn3 -व्यापार-

४७२ TL1, Dn3 तच्च साध्यताख्य-, Dn1 ततश्चसाध्यस्य

४७३ Dn3 वरणादा-

४७४ Dn2 -कृति-

-४६ TL1 कटादिपदस्य कटाद्वयविनिरूढ-, Dn1 घटादिपदे घटाद्यवयवे वीरणादौ निरूढि-, Dn3 घटादिपदस्य घटाद्यवयवे निरूढ-

४६-

४७५ Dn1 तत्र विनालक्षणं #इति नास्ति।#

४७६ Dn1 घटादेः

४७७ Dn1 निरूढि-

४७८ TL1, Dn2 मुख्यप्रयोगायसाकत्वाच्च, मुख्यप्रयोगोपपादकत्वाच्च

४७९ Dn1 न इति नास्ति।

४८० Dn3 स्तोकं पचतीत्यादौ, Dn2 अतीतमित्यादौ

गौणकारकत्वासंभवात्।।'स्तोकं पचती'त्यादौ क्रियाविशेषणोत्तर[४८१] द्वितीया-विशेषणविभक्तिवत्प्रयोग[साधुत्वाय [४८२]]। नामार्थधात्वर्थयोरभेदान्वय [४८३] स्वीकारेणाभेदस्य[४८४] संसर्गत्वात्[४८५]। तदस्वीकारे[४८६] तु [४८७]विशेषणविभक्तिवत् अस्तु [४८८] साऽभेदार्थिका [४८९]। तस्य [४९०] कारकत्वाभावस्तु क्रियान्वित [४९१]-कर्तृत्वाद्यन्वितत्वाभावादिति दिक्। ।। इति कर्मकारकं सम्पूर्णम्[४९२]।।

करणकारक वादः

करणत्वं कारकान्तरेणाचरितार्थत्वे [४९३] सति क्रियाहेतुत्वम्। कारकान्तरनिष्ठव्यापार सम्बन्धावच्छिन्न [४९४] [द्वारा]क्रियाहेतुत्वाभावः सत्यन्तार्थः। [-४७]कर्तृकारके [४९५] आरम्भक संयोगप्रैतद्वन्द्विविभागानुकूल [४९६] -

---

४८१ TL1 -विशेषणे द्वितीय्या, Dn3 -विशेषणपदोत्तरद्वितीय्या, Dn2 -विशेषणपदान्तरद्वितीया
४८२ Dn1 साधुत्वायां
४८३ TL1 नामार्थयोरभेदान्वय-
४८४ TL1 -स्वीकारेण भेदस्य, Dn3 -स्वीकारेणभेदस्य, Dn1 -स्वीकारेणाभेदस्य इति नास्ति।
४८५ Dn1 संसर्गत्वात् #इति नास्ति।#
४८६ TL1,Dn2 तदा स्वीकारे ।, Dn1स्वीकारे
४८७ TL1 तत्र #इत्यधिकम्।#
४८८ TL1 विशेषणविभक्तिपदस्तु, Dn1 विशेषणविभक्तिस्तु, Dn2 विशेषणविभक्तिवदस्तु
४८९ Dn1 अभेदार्थिका
४९० Dn1 तस्य #इति नास्ति।#
४९१ Dn3 कर्तृत्वान्विताभावादिति, Dn1 कर्तृत्वान्वितत्वाभावादिति
४९२ TL1, Dn3 इति.....सम्पूर्णम् #इति नास्ति।#, Dn2 इति कर्मनिरूपणम्।
४९३ TL1 -न्तरे चरितार्थत्वे, Dn1 -न्तरे आचर्तार्थत्वे
४९४ Dn1,Dn2,Dn3 -सम्बन्धावच्छिन्न- #इति नास्ति।#
-४७ Dn1 कर्तृकर्मणोः कुठारादिनिष्ठ- ,कर्तृकारके........ करणनिष्ठ- #इति नास्ति।#
४९५ Dn3,TL1 कर्तृकारके #इति नास्ति।#

कुठारादिक्रियाया एव च्छिदादिधात्वर्थतया कर्तुः कुठारादिकरणनिष्ठ[४७-] व्यापारद्वारा च्छिदादिहेतुत्वान्नातिप्रसंगः। [-४८]कर्मणस्तु तादृशक्रियाहेतुत्व-विरहादेव[४९७] ना[४९८] तिप्रसङ्गः[४८-]। कर्तृकर्मान्यतरव्यापार[४९९] द्वारा क्रियाहेतुः 'चैत्रो गृहे स्थाल्यामोदनं पचती'त्यादौ गृहस्थाल्याद्यधि[५००] करणं[५०१] कर्तृकर्म[५०२]संयोगद्वारा पाकक्रियासाधनम्[५०३]।

संप्रदानं[५०४] स्वानुमतिप्रकाशनेन कर्तुरिच्छाद्वारा दाननिमित्तम्। अपादानम्[५०५] पतनप्रति[५०६] बंधकसंयोग[५०७] नाशकपत्रादिविभागद्वारा पतनादि-निमित्तमिति नातिप्रसंगः। नचैवं कुठारादि{करणस्यापि} कर्तुनिष्ठव्यापार[५०८]-सापेक्षत्वादव्याप्तिः[५०९]। xxxi [-४९]कारकान्तरनिष्ठव्यापारसम्बन्धावच्छिन्न-

---

४९६ TL1, Dn3 -प्रतिद्वन्द्विभागानुकूल-
४७-
-४८ Dn1 अधिकरणमपि
४९७ TL1 -क्रियाहेतुत्वाभावादेव, Dn3 -क्रियाहेतुत्वविरहादेव
४९८ Dn3 ना #इति नास्ति।#
४८-
४९९ Dn1 -व्यापार- #इति नास्ति।#
५०० Dn1 -स्थाल्यादधि-
५०१ Dn3 करणक-, Dn2 करणकं
५०२ TL1 कर्मादिसंयोगादि-, Dn3 कर्मादिसंयोग-
५०३ Dn1 द्वारकं, Dn3 पाकदिक्रियासाधनं, Dn2 पाकादिक्रियासाधनं
५०४ Dn3 संप्रदानस्वानुमिति-
५०५ Dn3 निमित्तत्वम्। अपादानं
५०६ Dn3 पतनप्रति-, Dn1 पतनं प्रति-
५०७ Dn1 -द्वारा- #इत्यधिकम्।#
५०८ TL1 कर्तृकर्मनिष्ठव्यापार-, Dn1 कर्तृकर्मविशिष्ठव्यापार-
५०९ Dn3 -दतिव्याप्तिः, Dn2 -दसंभवः

जनकत्वाभावस्य सत्यन्तार्थतया[५१०] कुठारादिक्रियायां[५११] कुठारस्य तादात्म्य-[५१२] सम्बन्धेन हेतुतया[५१३] कर्तृनिष्ठव्यापारसम्बन्धेनाहेतुत्वात्[५१४] । न च कुठारादिव्यापारादावतिव्याप्तिरिति वाच्यं[५१५], तस्यापि एतन्मते[५१६] लक्ष्यत्वात्[४९-] । अत[५१७]एव फलायोगव्यवच्छिन्नं कारणं करणमिति वदन्ति।

वस्तुतस्तु व्यापारवत्वे सति कारणं करणम्[५१८] । नचैवं कार्यमात्रे ज्ञानादौ[५१९] च दृष्टस्य मनोयोगस्य[५२०] व्यापारस्य[५२१] सत्वादात्मनोऽपि[५२२] करणत्वापत्तिः। इष्टत्वात्। [५२३] उपधेयसङ्करेऽपि[५२४] कर्तृत्वकरणत्व-लक्षणो[५२५] पाधेरसङ्करात् व्यवहार[५२६] भेदोपपत्तेः[५२७] । इत्थं चानुमितौ

-४९ Dn1 एतन्मते च स्म कारणस्यैव लक्ष्यत्वात्।
५१० TL1 सत्यन्तार्थकतया,
५११ TL1 क्रियारूपच्छिदादि क्रियायां, Dn3 क्रियायाः
५१२ TL1 कुठारादेस्तादात्म्ये न, Dn3 कुठारस्य तादात्म्येन
५१३ TL1 हेतुतया, Dn3 हेतुत्वतया
५१४ TL1 -सम्बन्धेन। हेतुत्वात्।
५१५ TL1 कुठाराभिघातेतिव्याप्तिः, Dn3 कर्तृकुठाराभिघातेऽतिव्याप्तिः
५१६ TL1 तन्मते, Dn3 एतन्मते #इति नास्ति।#
४९-
५१७ Dn3 एव #इति नास्ति।#
५१८ Dn1 कारणत्वं करणत्वं ।
५१९ Dn1 अदृष्टस्य
५२० Dn3, Dn2 च #इत्यधिकम्।#
५२१ TL1 च #इत्यधिकम्।#
५२२ TL1 कारणत्वापत्तिः
५२३ Dn3 उपाधेय
५२४ Dn2 -अपि #इति नास्ति।#
५२५ TL1, Dn3 कर्तृत्वकरणत्वलक्षणो-, Dn1 कर्तृत्वानुकरणत्वादिलक्षणो-
५२६ TL1 -राद्व्यवहार-, Dn1 -राव्यवहार-

व्याप्तिज्ञानं[५२८] करणं, परामर्शस्य व्यापारत्वात्। चाक्षुषादौ चक्षुरादि (करणं) तत्संयोगस्य व्यापारत्वात्। श्रावणज्ञाने श्रोत्रं (करणं) श्रोत्रमनोयोगस्य[५२९]-व्यापारत्वात्। न तु[५३०] शब्दस्य, शब्दाभावप्रत्यक्षे तस्य व्यभिचारात्।

परे तु [५३१] फलानुकूल [५३२] कर्तृव्यापारत्वं करणत्वम् [५३३] । अस्ति च [५३४]कुठारादौ [५३५]छिदानुकूलकर्तृ[५३६]संयोगादि[५३७]व्यापारवत्वम्। न च गृहस्थाल्या-[५३८]द्यधिकरणस्यापि कर्तृव्यापारवत्वात् करणत्वापत्तिः। इष्टत्वात्। 'स्थाल्या अन्नं साधयती' [५३९]त्यादिप्रयोगात्, एवं[५४०] 'गवा दानं साधयति', 'ब्राह्मणेन [५४१]दानं साधयती'त्यादि-प्रयोगात् तत्रापि तदिष्टम्। 'चैत्र आत्मना चैत्रेण वा [५४२]पचती'त्याद्यप्रयोगात्। कर्तुः शरीरस्य [५४३]च वारणाय द्रव्यसमवायिभिन्नात्[५४४]

---

५२७ Dn3 -भेदापत्तेः
५२८ TL1 -ज्ञानं कारणं
५२९ Dn2 श्रोत्रमनः संयोगस्य व्यापारस्य सत्वात्।
५३० Dn1 तु #इति नास्ति।#
५३१ Dn3 -व्यापारानुकूल-
५३२ TL1 –कर्तृ- #इति नास्ति।#
५३३ Dn2 करणत्वम् #इति नास्ति।#
५३४ TL1 कुठारादेः क्रिया, Dn3 कुठारादेः
५३५ Dn3 च्छिदाद्यनुकूल-
५३६ TL1, Dn3, Dn2 संयोगादिमत्वम्
५३७ TL1 व्यापारवत्वम् #इति नास्ति।#
५३८ Dn3 -स्थाल्याधिकरण-
५३९ Dn3 साधयतीति
५४० TL1, Dn3, Dn2 एवं #इति नास्ति।#
५४१ TL1, Dn3 दानं #इति नास्ति।#
५४२ Dn3, Dn2 पचतीत्यप्रयोगात्

क्रियानुकूलकृतिमतो भिन्नत्वेन विशेष्यम्। कृतिमत्त्वं[५४५] समवायेनावच्छेदकतया[५४६] च। तेन[५४७] शरीरस्यापि व्युदासः[५४८]। भिन्नादित्यन्तेन[५४९] हस्तादिसंग्रहः हस्तादिना छिनत्तीत्यादि [५५०] प्रयोगात्। व्यापारवत्त्वं च [५५१] जनकतया। तेन [५५२] व्याप्ति-स्मृत्यादि[५५३]साधारण्यमित्याहुः।

अत्र [५५४] परशुना छिनत्तीत्यादौ निरुक्तकरणत्वं तृतीयार्थः। (आधेयत्वेन)[५५५] प्रकृत्यर्थान्वितस्य तस्य[५५६] धात्वर्थे निरूपकत्वेनान्वयः। तथा च [५५७] परशुनिष्ठकरणतानिरूपक[५५८] छिदानुकूलकृतिमानिति वाक्यार्थ[५५९] इति प्राञ्चः।।

---

543 Dn3 च #इत्यधिकम्।#
५४४ TL1 द्रव्यसमवायिभिन्नस्य, Dn1 द्रव्यं समं व्याप्तिभिन्न, Dn2 द्रव्यसमवायिभिन्नतत्तत्
५४५ Dn1 कृतिमतः
५४६ TL1, Dn3, Dn2 -अवच्छेदकतया
५४७ TL1,Dn1 तेन #इति नास्ति।#
५४८ Dn1 शरीरत्यव्युदोदासः।
५४९ TL1 भिन्नस्येत्यन्तेन, Dn1 भिन्नस्येव्यतेन, Dn2 भिन्नत्यनेन न
५५० TL1, Dn3, Dn2 च्छिनत्तीति
५५१ Dn2 च #इति नास्ति।#
५५२ Dn3 न #इत्यधिकम्।#
५५३ Dn3 साधारणमित्याहुः
५५४ Dn3, Dn1 च #इत्यधिकम्।#
५५५ Dn1 आश्रयत्वेन
५५६ Dn1,Dn3,TL1 तस्य #इति नास्ति।#
५५७ Dn1,Dn2 SÉ #<ÊiÉ xÉÉÎºiÉ*#
५५८ Dn2 निरूपकत्व-
५५९ Dn3 ज्ञानमिति

नव्यास्तु, 'परशुना छिनत्ति न[५६०] दात्रेणे'त्यादौ नञर्थान्वयानुरोधेन[५६१] निरुक्तकरणत्व[५६२] निरूपितं जन्यत्वमेव[५६३] तृतीयार्थः। तस्य[५६४] निरूपितत्वसंबन्धेन[५६५] प्रकृत्यर्थान्वितस्याश्रयतया धात्वर्थेऽन्वयः। इत्थं च[५६६] परशुनिरूपितं[५६७] जन्यत्वं दातृनिरूपितजन्यत्वाभावश्च च्छिदायामन्वेतीत्याहुः[५६८]।

'जटाभिस्तापसः'[५६९] इत्यादौ[५७०] तृतीयोपलक्षणे। तत्वं[५७१] च [५७२] अतद्व्यावृत्यनवच्छेदकत्वे* सति अतद्व्यावृत्तिसमानाधिकरणत्वम्[५७३]। अस्ति च जटाया[५७४] मतांपस[५७५] व्यावृत्यनवच्छेदकत्वम्, [५७६] शमदमादि-

---

५६० Dn1 न #इति नास्ति।#
५६१ Dn3 -अनुरोधेन निरुक्त-, Dn1 -न्वयबोधनिरूक्त-
५६२ Dn1,TL1 -कारणता
५६३ Dn2 तज्जन्यत्व-, Dn1 निरूपितं जन्यत्वमेव
५६४ Dn3 च #इत्यधिकम्।#
५६५ TL1, Dn3, Dn2 निरूपितत्वेन प्रकृत्य-
५६६ Dn3 च #इति नास्ति।#
५६७ Dn3 निरूपितजन्यत्व-
५६८ Dn1 च्छिदायामस्तीत्याहुः
५६९ Dn2 जटाभिरतापसः #इति नास्ति।#
५७० Dn3, Dn2 इत्यादौ #इति नास्ति।#
५७१ Dn1 तृतीयार्थइत्थंभूतलक्षणे तत्वं
५७२ TL1 तत्तद्व्यावृत्यनव-, Dn1 तद्व्यावृत्यनव-
* अनवच्छेदकत्वमिति भवितव्यमिति भाति अग्रिमपाठानुरोधात्।
५७३ Dn3 सामानाधिकरणत्वम्, Dn2 समानाधिकरण्या-
५७४ Dn2 घटानां
५७५ Dn3 तापसव्यावृत्यन-, Dn2 अतापसत्वव्यावृत्यन-
५७६ Dn2 शमादिमत्व-

मत्वस्यैव[५७७] तदन्यूनानतिरिक्त[५७८]वृत्तितया तदवच्छेदकत्वात्। शमदमादिना[५७९] तापस इतित्वप्रयोगः [५८०] । विवक्षातस्तथात्वे तु [५८१] विशेषणोपलक्षण-साधारणं[५८२] वैशिष्ट्यमेव तृतीयार्थ इति। ‘अक्ष्णा[५८३] काणः’ ‘पादेन खंज’ इत्यदौ “येनांगविकार[xxxii]” इति[५८४] सूत्रेण तृतीया। येनांगेन[५८५] विकारो हानिराधिक्यं वा तदंगबोधकात्[५८६] तृतीयेति[-५०] सूत्रार्थः। एवं च[५०-] अत्र[५८७] तृतीयायाः वृत्तित्वमर्थः। तच्च व्युत्पत्तिवैचित्र्यात्काणादि [५८८] पदार्थैकदेशे [५८९] विकारेऽन्वेति[५९०] । काणत्वं[५९१] च[५९२] बहि[५९३]रवच्छेदेन चक्षुःशून्यगोलकवत्वम्।

---

५७७ Dn1,TL1 दमादिमत्वस्यैवे-
५७८ Dn2 -अतिरिक्त-
५७९ TL1, Dn2 शमादिना
५८० TL1 इतित्वपप्रयोगः, Dn1 इति दुष्प्रयोगः, Dn2 इत्यप्रयोगो
५८१ Dn3 प्रयोगस्येष्टत्वेऽपि #इत्यधिकम्।#, Dn1,TL1 प्रयोगस्येष्टत्वेन #इत्यधिकम्।#
५८२ Dn1 -साधारण, Dn1 -साधारण्य-
५८३ Dn1 अलक्षणे
५८४ TL1, Dn2 इत्यनेन तृतीया
५८५ TL1, Dn3 येनांग-
५८६ Dn1 वादमंबोधकात् , Dn3 वा तदंगबोधिका, Dn2 वा तदंगबोधिकात्
-५० Dn2 इति......च #पर्यन्तं नास्ति।#
५०-
५८७ Dn2, Dn1, Dn3 अत्र #इति नास्ति।#
५८८ TL1 -वैचित्र्यात्करणादि, Dn3 -वैचित्र्यात्।।करणादि, Dn1 -वैचित्र्यकव्यारणादि
५८९ Dn2 -पदार्थस्यैकदेशे
५९० Dn1 विकारेवेति
५९१ Dn1,Dn3,TL1 कारणत्वं
५९२ Dn2 च #इति नास्ति।#
५९३ Dn1, Dn3 ब्रूहि-

जातमात्रान्धस्य[५९४] [काणत्वे[५९५]] तु चक्षुष्मद्गोलकवत्वे[५९६] सतीति वाच्यम्। यदि च[५९७] बहिरवच्छेदेन चक्षुःसत्वेऽपि उपघातादेव न चाक्षुषम्, तदा उपहत[५९८]गोलक[-५१]वत्वमेव [काणत्वम्[५९९]]। अक्षिपदं[६००] चक्षुष्मद्गोलकपरम्। तथा (च) तादृशगोल[५१-]वृत्ति[६०१] यच्चक्षुश्शून्यत्वम् उपघातो वा तद्विशिष्ट[६०२] गोलकवानित्यक्ष्णा[६०३] काणः[६०४] इत्यस्यार्थः। एवं खंजत्वं संस्थानविशेषशून्यपादवत्वम्[६०५]। तथा च[६०६] पादवृत्तियत्तथाविध[६०७] -संस्थानशून्यत्वं[$] तद्विशिष्टपादवानिति[६०८]पादेन खंज इत्यस्यार्थः।[६०९]

---

५९४ TL1 जातप्रसन्नान्धस्य, Dn3 जातप्रसूतान्धस्य, Dn1 जात्यंधस्य
५९५ Dn1 कारणत्वे
५९६ Dn1 चक्षुरुष्मगोलकत्वे, Dn2 चक्षुर्मद्गोलकत्वे
५९७ Dn3 च #इति नास्ति।#
५९८ Dn1 तदातदोपहित-, Dn2 तदा-
-५१ Dn2 वत्वमेव....गोल #पर्यन्तं नास्ति।#
५९९ Dn3 कारणत्वं, Dn1 करणत्वम्
६०० Dn3, Dn2 च #इत्यधिकम्।#
५१-
६०१ TL1 बहिरवच्छेदेन #इत्यधिकम्।#, Dn2 यत्तत् शून्यत्वं
६०२ TL1 विशिष्ठ-, Dn2 तद्विशिष्ठः
६०३ Dn2 पुरुषः अक्ष्णा
६०४ Dn3 कारणमित्यस्यार्थः।
६०५ Dn3 -पदवत्वम्, Dn2 -पदत्वम्
६०६ Dn1,TL1 तथा #इति नास्ति।#
६०७ Dn3 -विधोपलक्षणवैशिष्ठे करणवृत्तिहेतुताः।। अभेदविद्यमानसहार्थाष्ठादि संप्रताः।
$ Dn3 अत्र समाप्ता।
६०८ Dn1 पादवानिति पादोने खंज, Dn2 पुरुष इति पादेन खंज
६०९ TL1 इति मुखवृत्तिलोचनत्रयवानिति मुखेन त्रिलोचन इत्यस्यार्थः। इत्यधिकम्।

परे तु 'अक्ष्णा काणः' इत्याख्यादा[६१०] वभेदे तृतीया। तथा च तादृशगोलकाभिन्नं यच्चक्षुश्शून्यमुपहतं वा[६११] तद्वानिति[६१२] वाक्यार्थः[६१३]। एवं -[५२]'मुखेन त्रिलोचन' इत्यत्र लोचनपदं[५२-] लोचनत्रयविशिष्टवत्परम्। तथा च [मुखाभिन्न[६१४]][xxxiii]लोचनत्रयविशिष्टवानित्यर्थ इत्याहुः।

'धनेन [६१५] कुल'मित्यादौ हेतुत्वे तृतीया। क्रियान्वयिनिरुक्त-करणत्वार्थिका [६१६] तृतीया "कर्तृकरणयोस्तृतीये [xxxiv] "त्यनेन विहिता। -[५३]"हेता[xxxv]"विति सूत्रेण तु नामार्थेऽप्यन्वित-हेतुत्वार्थिकेति[५३-] विशेषः।।

'पुत्रेण सहागतः पिते'त्यत्र [६१७] तृतीयायाः कर्तृत्वमर्थः। {सहशब्द [६१८] }समभिव्याहृतक्रिया सहशब्दार्थः। एकदेशावच्छेदेन [६१९] एक-

---

६१० TL1 इत्यादौ अभेदे, Dn2 इत्याद्यभेदे
६११ Dn2 वा #इति नास्ति#
६१२ Dn1,Dn3 तद्वाति
६१३ Dn2 वाक्यार्थः #इति नास्ति।#
-५२ Dn1,Dn3,TL1 त्रिलोचनपदं
५२-
६१४ TL1 मुखभिन्न, Dn2 मुखादिभिन्न, Dn1 मुखावच्छिन्नभिन्न
६१५ TL1 धननकुल-
६१६ Dn1 अक्षरलोपः
-५३ Dn1 अक्षरलोपः, Dn2 हेतौ इति सूत्रेण तु नामार्थान्वितहेतुत्वार्थिकेति
५३-
६१७ TL1 इत्यादौ, Dn1 पितेत्यादौ
६१८ Dn2 सहशब्द #इति नास्ति।#
६१९ TL1, Dn2 एकदेशावच्छेदेन #इति नास्ति।#

कालिकत्व [६२०] सम्बन्धेन तस्याः [६२१] समभिव्याहृतक्रियायामन्वयः। तथा [-५४]चैककालीनत्वसम्बन्धेन पुत्रकर्तृकागमनविशिष्टागमन[५४-] [६२२] कर्तेत्यर्थः। 'शिष्येण सह गुरुः [-५५]ब्राह्मणः' 'पुत्रेण सह पिता सुन्दरः', इत्यादौ सहार्थो ब्राह्मण्यादिसमकालीनत्व सम्बन्धेन ब्राह्मणादि [५५-] पदार्थैकदेशेऽन्वेति।

परे [६२३] तु अत्र [६२४] सहार्थः [-५६]साहित्य[*] {एक} बुद्धिविशेषविषयत्व-रूपम्[५६-]। तृतीयार्थो वृत्तित्वं संख्यामात्रं वा [६२५]। तथा च शिष्यवृत्ति [६२६]-साहित्यवान् गुरुर्ब्राह्मण इत्यादिबोध इत्याहुः[६२७]।

"एकेनापि सुपुत्रेण सिंही स्वपिति[६२८] निर्भयम्।

सहैव[६२९] दशभिः पुत्रैर्भारं वहति गर्दभी[६३०]।।"

---

६२० TL1, Dn2 एककालीनत्व-
६२१ Dn2 तस्याः #इति नास्ति।#
-५४ Dn1 च पुत्रकर्तृकतादृशगमनकालीन-, Dn2 च पुत्रकर्तृकागमनकालीन-
५४-
६२२ Dn1 गमन #इत्यधिकम्।#
-५५ TL1 ब्राह्मणः पुत्रेण सह पिता सुन्दरः सहार्थो ब्राह्मणादिसमानकालीनत्वसम्बन्धेन ब्राह्मणत्वादि, Dn1 ब्राह्मणीत्यादि
५५-
६२३ Dn2 अपरे
६२४ Dn2 अत्र #इति नास्ति।#
-५६ TL1, Dn2 एकधर्ममात्रं
* #एक इत्यपि भवितव्यम् इति भाति।#
५६-
६२५ Dn1 अक्षरलोपः
६२६ Dn1 -वृत्ति- #इति नास्ति।#
६२७ Dn2 इत्यादि बोधः #इत्यधिकम्।#
६२८ Dn1 सिद्धित्वमेति

इत्यादौ पुत्रेषु भारवहनकर्तृत्वाभावेऽपि सहप्रयोगे विद्यमानेत्यध्याहारात्[६३१] विद्यमानत्वं सहार्थः[६३२]। तथा चैककालीनत्व[६३३]-सम्बन्धेन दशपुत्रवृत्तिविद्यमानत्वविशिष्टविद्यमानत्वाश्रय इत्यन्वय[६३४]बोधः। अत एव विद्यमान[६३५] सहार्थे तृतीयेतिशाब्दिकाः।

'धान्येन धनी', 'गोत्रेण गार्ग्यः', 'प्रकृत्या अभिरूप' इत्यादौ -[५७]तृतीयाया अभेदोऽर्थः। तथा च[५७-] धान्याभिन्न[६३६] धनवान्, गोत्राभिन्न-गर्गकुलो[६३७]त्पन्नः, साहजिकाभिन्न[६३८] रमणीयतावानित्यर्थः। प्रकृतिपदस्य साहजिकार्थकत्वात्[६३९]। अभि[६४०]रूपपदस्य च[६४१] रमणीयतावदर्थकत्वा[६४२]दिति दिक्। ।। इति करणकारकम्[६४३] ।।

---

६२९ Dn1 सदैव
६३० Dn1 गर्दभः
६३१ Dn2 विद्यमानपदाध्याहारात्
६३२ TL1 सहशब्दार्थः।, Dn2 साहित्यं सह शब्दार्थः।
६३३ Dn2 समकालीन-
६३४ TL1 इत्याकारकान्वय बोधः।, Dn2 इत्यन्वय बोधः #इति नास्ति।#
६३५ TL1 सहशब्दार्थे, Dn2 नत्वं सहशब्दार्थः
-५७ Dn1 तृतीया अभेदे-
५७-
६३६ Dn1 धान्याद्यभिन्न-
६३७ TL1 -गार्ग्यकुलो-
६३८ TL1 साहजिक-, Dn1 सहजिक-
६३९ TL1 साहजिकार्थ स
६४० Dn2 अक्षरलोपः
६४१ TL1, Dn2 च #इति नास्ति।#
६४२ Dn2 -पदार्थत्वा-
६४३ TL1, Dn2 इति करणकारकम् #इति नास्ति।#

सम्प्रदानकारकवादः

"कर्मणा यमभिप्रैति स सम्प्रदान [xxxvi] "मिति पाणिनिसूत्रम्। तत्क्रियाकारणीभूतेन तत्क्रियाकर्मणा यमभिप्रैति = फलभागित्वेनोद्देश्यं [६४४] करोति स सम्प्रदानमिति [६४५] सूत्रार्थः [६४६] । करणीभूतकर्मजन्यफलभागित्वेनोद्देश्यत्वं सम्प्रदानत्वम् इति फलितम्। 'ग्रामं गच्छती'त्यादौ [६४७] गमनकर्मग्रामजन्यसुखादिभागित्वेनोद्देश्यस्य [६४८] चैत्रादेस्तत्क्रियायां सम्प्रदानत्वाभावात्, तद्वारणाय करणीभूतेति। गमनक्रियायां ग्रामस्याकरणत्वा [६४९] -न्नदोषः। दानादौ तु[६५०] देयादि[६५१] करणमिति प्रकृत[६५२]संगतिः।

पितुः[६५३] स्वर्गोद्देशेन कृतगोदानादि[६५४]स्थले दानजन्यफलभागित्वेनैव पितुरुद्देश्यत्वेऽपि[६५५] न गोजन्यफलभागित्वेनेति न पित्रादेः सम्प्रदानत्वम्। अत एव 'पित्रे गां ददाती'ति न प्रयोगः। यदि चादृष्टद्वारा [गोरपि जन्यत्वं

---

६४४ Dn2 -द्देशी
६४५ Dn1 तत्सम्प्रदानमिति
६४६ Dn2 वाक्यार्थः
६४७ Dn1 गच्छतीत्यत्र
६४८ TL1 -सुखभागित्वेन, Dn1 -सुखभागित्वेनोद्देश्य
६४९ Dn2 -अकारणत्वान्नदोषः।
६५० Dn2 तु #इति नास्ति।#
६५१ Dn2 -देयादिकं
६५२ Dn2 प्रकृति-
६५३ TL1 पित्र-, Dn2 पितृ-
६५४ Dn2 -दानस्थले
६५५ TL1 पिता उद्देश्यः। न तु, Dn2 पितोद्देश्यः। न तु

फले[६५६]]* दत्ता[६५७] गौः पितुः[६५८] स्वर्गमुत्पादयिष्यतीति [६५९] [६६०]चाभिसंधिः, तदा फले कर्मजन्यत्वमदृष्टाद्वारकं [६६१] ग्राह्यम्। अत एव स्वस्मिन् न स्वकर्तृक-दानसम्प्रदानत्वापत्तिः; न वा 'चैत्रश्चैत्राय[६६२] गां ददाती'ति प्रयोगः[६६३]।

वस्तुतो धात्वर्थतावच्छेदकत्वेन [फलम्][६६४] विशेष्यम्[xxxvii]। पितृ[६६५]-स्वर्गादिकं तु[६६६] [xxxviii]न तथेत्यदोषः। इत्थं च 'विप्राय गां ददाती'त्यादौ[६६७] सम्बन्धित्वेन परेच्छाविषयत्वं चतुर्थ्यर्थः।

[-५८]'चैत्राय चैत्रो ग्रामं गच्छती'त्यादि[५८-]वारणाय परेति। स च धात्वर्थतावच्छेदक फलेऽन्वेति। वृत्तित्वं द्वितीयार्थः। तथा च [६६८] विप्र-

---

६५६ Dn2 गोरपि जन्यत्वं फले #इति नास्ति।#

* #व्याख्यातृ प्रक्षेपः। जनकत्वात् इति भवितव्यम् इति भाति।#

६५७ Dn1 दाता।

६५८ Dn1 पितृ

६५९ Dn1 उत्पादयितानि

६६० Dn2 च #इति नास्ति।#

६६१ TL1 -दृष्ट द्वारकं

६६२ Dn1 चैत्रादि

६६३ TL1, Dn2 प्रयोगप्रसङ्गः

६६४ Dn1 फले

६६५ Dn1 स्वपितृ-, Dn2 पितुः

६६६ Dn2 तु #इति नास्ति।#

६६७ Dn2 ददातीत्यत्र

-५८ TL1 चैत्रश्चैत्राय गच्छतीति, Dn1 चैत्रश्चैत्रंगच्छतीत्यादि

५८-

६६८ Dn2 #गोवृत्तिस्वस्वत्वध्वंस' इति विप्रसम्बन्धित्वेन इत्यस्य पूर्वं वर्तते।#

च धात्वर्थतावच्छेदके संयोगेऽन्वेति। वृत्तित्वरूपद्वितीयार्थोऽपि तादृश-द्रवद्रव्य(वृत्ति)क्रियायाम्। एवं च वृक्षवृत्ति[५९-§]संयोगानुकूलद्रव[६८१]-द्रव्यवृत्ति[६८२] क्रियानुकूलव्यापारा[६८३] नुकूल[६८४] कृतिमानित्यन्वयधीः[६८५]। अत्र[६८६] [x1] क्रियान्तस्य[६८७] धात्वर्थत्वे[६८८] वृक्षस्य कर्मत्वं स्यात्; न [-६०]तु जलस्य। क्रियायाः वृक्षापेक्षयैव पर[६८९]समवेतत्वात्। न[६०-] चैवं 'पयसा वृक्षमासिञ्चती'ति [६९०] न स्यात्। धात्वर्थतावच्छेदकक्रियायाः वृक्षा[६९१]वृत्तित्वादिति वाच्यम्। अत्र क्रियान्तस्यैव[६९२] धात्वर्थतया धात्वर्थतावच्छेदक[६९३]संयोगस्य वृक्षवृत्तित्वात्[६९४]।

५९-
§ Dn3 अत्रारभ्यते पुनः।
६८१ Dn3 -द्रव- #इति नास्ति।#
६८२ Dn3 -वृत्ति- #इति नास्ति।#
६८३ TL1 -वृत्तिक्रियानुकूलव्यापारा- #इति नास्ति।#
६८४ Dn3 -व्यापारानुकूल- #इति नास्ति।#
६८५ Dn3 -निति बोधः।, Dn2 -न्वयधीरिति। Dn2
६८६ Dn3 तत्र
६८७ Dn1 एव #इत्यधिकम्।#
६८८ Dn1 या #इत्यधिकम्।#
-६० Dn3 तु जलस्य.......त्वात्। न #पर्यन्तं नास्ति।#
६८९ Dn2 -पर- #इति नास्ति।#
६०-
६९० Dn2 -तीत्यादौ कर्मत्वं #इत्यधिकम्।#
६९१ Dn1 वृक्ष-
६९२ Dn3 क्रियान्तरस्यैव, Dn2 क्रियान्तस्य
६९३ Dn2 -द्रवद्रव्य- #इत्यधिकम्।#
६९४ Dn1 इति वाच्यम् #इत्यधिकम्।#

सम्बन्धित्वेन परेच्छाविषयगोवृत्तिस्वस्वत्वध्वंसपूर्वक [६६९] परस्वत्वानुकूल-त्यागानुकूलकृतिमानित्यन्वयधीः[६७०] ।[xxxix]

यत्तु अत्र[६७१] जन्यफलप्रकारकेच्छापूर्वकत्वं क्रियान्वयि[६७२] चतुर्थ्यर्थः। व्युत्पत्तिवैचित्र्याच्च तदेकदेशे जन्यत्वे कर्मणो गवादेः निरूपितत्व [६७३] -सम्बन्धेनान्वयः। तथा च विप्रविषयकगो [६७४] जन्यफलप्रकारकेच्छापूर्वक-गोवृत्तिस्वस्वत्वध्वंसपरस्वत्वानुकूलत्यागानुकूलकृतिमानित्यन्वयधीरिति। तन्न। गोजन्यफलस्य प्रकृते [सुखरूपतया[६७५]] विप्रविषयका[६७६] या गोजन्यफल-प्रकारकेच्छा तत्पूर्वकत्वस्य दानेऽसंभवात्। तादृशेच्छाया[६७७] एव दानत्वादिति [६७८] दिक्।

एवं 'वृक्षायोदकमासिञ्चती'त्यादौ संयोगानु [६७९] कूलद्रवद्रव्यक्रिया-नुकूलव्यापारो धात्वर्थः। तथा च[६८०] वृक्षवृत्तित्वेनेच्छा[-५९]विषयत्वं चतुर्थ्यर्थः। स

---

६६९ TL1 -पूर्वक- #इति नास्ति।#
६७० TL1 -न्वयबोधः।
६७१ TL1 तत्
६७२ Dn1 क्रियान्वयि #इति नास्ति।#
६७३ Dn1 निरूपकता-
६७४ Dn2 -निरूपित- #इत्यधिकम्।#
६७५ Dn2 स्वरूपतया-, Dn1 स्वत्वरूपततया-
६७६ Dn2 विषयिका-
६७७ Dn2 इच्छायायेव
६७८ TL1, Dn2 दानत्वात् गौरवाच्चेति दिक्।।
६७९ Dn2 संयोगावच्छिन्नद्रवद्रव्यक्रियावच्छिन्नव्यापारा-
६८० Dn2 तथा च #इति नास्ति।#
-५९ Dn1,TL1 विषयत्वं......वृक्षवृत्ति #पर्यन्तं नास्ति।#

द्रवद्रव्यसंयोग एव अत्र[६९५] धात्वर्थ इति तु [६९६] युक्तम्। तर्हि फलावच्छिन्न-व्यापाराबोधकतया [६९७] धातोरकर्मकत्वं, धात्वर्थतावच्छेदकफलशालि-त्वाभावाद्वृक्षादेः अकर्मकत्वं [६९८] च[६९९] स्यात्।

अत्रा'जां ग्रामं नयती'तिवत् द्विकर्मकत्वं स्यादिति तु[७००] न शङ्का। क्रियान्तार्थत्वे [धात्वर्थतावच्छेदक [७०१]]फलद्वयाभावात्। तादृशक्रियानुकूल-व्यापारार्थत्वे च[७०२] क्रियायामेव द्वितीयार्थवृत्तित्वान्वयात्। क्रियावच्छेदकसंयोगे तु [७०३] वृक्षायेत्यादि [७०४] चतुर्थ्यर्थस्योद्देश्यत्वस्यैवान्वयो न द्वितीयार्थस्य। व्युत्पत्तिवैचित्र्यात्। चतुर्थीसमभिव्याहृतस्यैव [७०५] सिच् [७०६] धातोस्तादृश-व्यापारार्थत्वात्।

अत एवा'जां ग्रामं नयती'त्यत्र ग्रामस्य न सम्प्रदानत्वम्। अत्र हि संयोगावच्छिन्नक्रियानुकूलव्यापारो प्रेरणं[७०७] धात्वर्थः। द्वितीयार्थो वृत्तित्वम्[७०८]।

---

६९५ Dn1 अत्र #इति नास्ति।#
६९६ न #इत्यधिकम्।#
६९७ TL1, Dn3, Dn2 -बोधकत्वात्
६९८ Dn1 अकर्मत्वं
६९९ TL1 न, Dn2 च #इति नास्ति।#
७०० TL1, Dn3 नाशङ्क्यम्।, Dn2 नाशङ्कनीयम्।
७०१ Dn1,TL1 धात्वर्थतावच्छेदक #इति नास्ति।#
७०२ Dn1,TL1 च #इति नास्ति।#
७०३ TL1 तु #इति नास्ति।#
७०४ Dn1 -वत् #इत्यधिकम्।#
७०५ Dn2 एव #इति नास्ति।#
७०६ Dn1 सिचि-
७०७ Dn1 प्रेरणादि #इति नास्ति।#

संयोगे तु[७०९] ग्रामपदोत्तरद्वितीयार्थः, क्रियायामजापदोत्तर[-६१] द्वितीयार्थोऽन्वेति। तथैव व्युत्पत्तेः।[६१-] तादृशफलभागित्वेन ग्रामस्यानुद्देश्यत्वात्[७१०] न सम्प्रदान-त्वम्[७११]। यथोद्देश्यत्वविवक्षायां ग्रामायाजां[७१२] नयतीति भवत्येवेति दिक्।

परे तु त्यज्यमान[७१३] द्रव्यस्वत्वभागित्वेनोद्देश्यत्वं सम्प्रदानत्वम्। त्यागोऽत्र विलक्षणो[७१४] ग्राह्यः[७१५]। तेन विक्रयादौ[७१६] क्रेत्रादेर्न[७१७] सम्प्रदानत्वम्। कर्मणा = दानकर्मणा[७१८] यमभिप्रैति स सम्प्रदानमिति[७१९] कर्मणेत्यादिसूत्रार्थः। अत एव सम्प्रदीयते [-६२]यस्मै तत्सम्प्रदानमिति[६२-] सम्प्रदानसंज्ञाप्यन्वर्थैव[७२०]।

---

७०८ Dn1 द्वितीयाद्वयार्थो

७०९ TL1 संयोगे, Dn3 संयोग, Dn1 संयोगो

-६१ TL1 द्वितीयार्थः अन्वेति। तथैव व्युत्पत्तेः।, Dn1 द्वितीयार्थान्वितेति। व्युत्पत्ति वैचित्र्यात्।
६१-

७१० TL1, Dn3, Dn2 ग्रामादेरनुद्देश्यत्वात्

७११ TL1 सम्प्रदानतातादृशफलभागित्वेनोद्देश्यत्वे तु तदोद्देश्यत्व-, Dn2 सम्प्रदानत्वं तादृशफलभागित्वेनोद्देश्यत्वे तु तदोद्देश्यत्व-, Dn3 सम्प्रदानता। तादृशफलभागित्वेनोद्देश्यत्वे तु उद्देश्यत्व-

७१२ Dn3 ग्राममजां

७१३ Dn3 यजमान-

७१४ Dn3 विवक्षणो, Dn1 लक्षणो

७१५ Dn1 ग्राहः

७१६ Dn1 #अक्षरलोपः#

७१७ Dn2, Dn3 क्रेतादेर्न

७१८ Dn1,Dn3,TL1 दानकर्मेणा

७१९ Dn1,Dn3 तत्सम्प्रदानमिति

-६२ TL1 अस्मे इति सम्प्रदान-, Dn3 यस्मै इति सम्प्रदान-, Dn2 अस्मै इति सम्प्रदान-
६२-

७२० Dn2 -अपि- #इति नास्ति।#

श्राद्धादौ पित्रादेः[७२१] [न] स्वत्वभागित्वेनोद्देश्यत्वम्; किन्तु [७२२]प्रीतिभागितया एवे [७२३] ति सम्प्रदानत्वाभावेन [७२४] सम्प्रदानचतुर्थ्यसम्भवात्, xli नमः स्वस्तीत्यादिसूत्रान्तरेण[७२५] तत्र चतुर्थी।।

एवं[७२६] [७२७] 'वृक्षायोदकं [७२८]सिञ्चती'त्यादौ सम्प्रदानप्रयोगो गौणः चतुर्थीप्राप्त्यर्थः[७२९]। अत एव 'शत्रवेऽस्त्रं मुञ्चति',[७३०] 'मित्राय दूतं प्रेषयती'-त्यादौ धात्वर्थतावच्छेदकफलभागित्वेनोद्देश्य[७३१]त्वाभावेऽपि चतुर्थी। विभागा-नुकूलक्रियानुकूल [७३२] व्यापारो मोचनम्; संयोगानुकूलक्रियानुकूलव्यापारः प्रेषणमिति[७३३], धात्वर्थतावच्छेदक[क्रियाजन्यविभागसंयोगादि[७३४]] शालित्वेन शत्रुमित्रयोरनुद्देश्यत्वम्। इत्थं च, उदकादिजन्यपल्लवादि[७३५] अस्त्रजन्य-

---

७२१ Dn1 पिदेर्न
७२२ Dn1,Dn3,TL1 प्रति-
७२३ TL1,Dn1,Dn2 एव #इति नास्ति।#
७२४ Dn3 -अभावत्वेन
७२५ TL1 सूत्रेण तत्र
७२६ TL1 एवं #इति नास्ति।#
७२७ Dn1 च #इत्यधिकम्।#
७२८ TL1, Dn3, Dn2 आसिञ्चति
७२९ Dn1 चतुर्थीप्राप्त्यर्थः #इति नास्ति।#
७३० TL1 इति #इत्यधिकम्।#
७३१ Dn1,Dn3,TL1 -फलोद्देश्य-
७३२ Dn1 -क्रियानुकूल- #इति नास्ति।#
७३३ TL1 प्रेरणमिति, Dn2 प्रेरणम्
७३४ TL1,Dn3 क्रियानुकूलफल-, Dn2 रूपजन्यफल-, Dn1 विभागसंयोगादिजनकक्रिया
७३५ Dn3 -फलशालि अस्त्र-, Dn2 -फलपल्लवाद्य-

दुःखादि दूत[७३६] जन्यवार्ताज्ञानादिफलशालित्वेनोद्देश्यत्वमेव वृक्षायेत्यादि[७३७]-चतुर्थीत्रयार्थः।[xlii] न च गुरुप्रीत्युद्देशेन[७३८] 'गुरुपुत्राय [-६३]दत्ते गुरवे {गां}[६३-] ददातीति' [७३९] स्यात्। तथाविवक्षायामिष्टत्वात्। अत एव रजक[७४०]-सम्बन्धित्वस्य[७४१] तात्पर्यविषयत्वे 'रजकस्य[७४२] वस्त्रं ददाती'ति [-६४]प्रयोगः। वस्त्रजन्यफलभागित्वेनोद्देश्यत्वस्य तत्वे तु 'रजकाय वस्त्रं ददाती'ति[७४३] भवितव्यम्।[६४-] न चैवं श्राद्धादावपि पित्रादेः प्रीतिभागितयोद्देश्यत्वा[७४४]-त्सम्प्रदानचतुर्थ्यैवोपपत्तेः[७४५] "नमः स्वस्तीत्यादि" सूत्रान्तरं[७४६] व्यर्थम्।

यत्किञ्चित्क्रियाकर्मजन्य[७४७] फलभागित्वे[७४८] नोद्देश्यत्वस्यैव गौण-सम्प्रदानत्व[७४९] रूपतया नमःपदार्थादेः[७५०] क्रियात्वाभावेन पृथक्सूत्रप्रणयनात्।

---

७३६ Dn3 दूतो
७३७ Dn3 वृक्षापेक्षयेत्यादि
७३८ Dn2 -द्देश्येन
-६३ Dn2 दत्तायां गवि गुरवे गां
६३-
७३९ Dn1 न #इत्यधिकम्।#
७४० Dn3 रजकस्य, Dn1 रज
७४१ Dn2 सम्बन्धि नस्तस्य
७४२ Dn3 रजकवस्त्रं
-६४ Dn1 भवति
७४३ TL1 ददातीत्येव, Dn3 ददातीत्येवं
६४-
७४४ TL1,Dn2, Dn3 -भागित्वेनोद्देश्य-
७४५ TL1 -चतुर्थ्युपपत्तेः, Dn1 -चतुर्थ्यैवापपत्तेः
७४६ Dn3 -सूत्रोत्तरं
७४७ TL1 -क्रिययाजन्य-, Dn1 -क्रियाजन्यकर्मजन्य-

'नारदाय रोचते कलहः', 'वैश्याय शतं धारयती'त्यादौ [७५१] तु [७५२] नारदादेर्न [७५३] सम्प्रदानता। किन्तु "रुच्यर्थानां प्रीयमाणः" [७५४], [xliii] "धारेरुत्तमर्णः"[xliv] इति सूत्राभ्यां सम्बन्धमात्रे[७५५] चतुर्थी। तथा च चतुर्थ्या - [१]सम्बन्धो, धातुना रुचिः, आख्यातेन[१-] विषयता बोध्यत इति नारदस्य रुचिविषयः कलह इत्यर्थः [७५६]। पुनर्दानमंगीकृत्य द्रव्यग्रहणं [७५७] धारणम्। वैश्यस्य [७५८] शतकर्मकतादृशग्रहणाश्रय [इत्यन्त्यस्यार्थः [७५९]]। सम्प्रदानस्य कारकत्वं धात्वर्थतावच्छेदक [७६०] फल[स्वत्व] निष्पादकत्वेन ददस्वेत्यनुमति-प्रकाशनेन [७६१]दातुरिच्छामुत्पाद्य [दानसम्पादनेन[७६२]] [७६३]चेति।

---

७४८ Dn2 -फलशालित्वे-
७४९ Dn1,Dn3 सम्प्रदान-
७५० Dn1,TL1 पदादेः
७५१ TL1 धारतीत्यादौ
७५२ TL1, Dn3 तु #इति नास्ति।#
७५३ Dn3 न सम्प्रदानत्वं नारदादेः।
७५४ TL1 प्रतीयमायाः, Dn1,Dn3 प्रियमाणः
७५५ Dn1 सम्प्रदानमात्रे
-१ Dn1 सम्बन्धः रुचिधातुनाख्यातेन
१-
७५६ Dn3 इत्याद्यर्थः।, Dn2 इत्याद्यस्य
७५७ TL1 ग्रहणधारणम्
७५८ Dn1 #अक्षरलोपः#
७५९ TL1 इत्यर्थः, Dn2 इत्थं तस्यार्थः।, Dn1 इत्यस्यार्थः
७६० TL1,Dn2 -स्वत्व-
७६१ TL1,Dn3 वक्तु-, Dn1 कर्तृ-
७६२ Dn1 दानसम्प्रदानेन
७६३ TL1 वा इत्यर्थः, Dn3 वेत्याहुः।।, Dn2 एवेत्याहुः।

परे तु त्यागजन्यस्वत्वजनकस्वीकारवत्त्वं[७६४] सम्प्रदानत्वम्। 'श्राद्धादौ पित्रादेर्न स्वीकारः'। 'रुद्राय गां ददाती'यादावपि [७६५] गौणसम्प्रदानत्वमुद्देश्यत्वरूपमित्याहुः। ।। इति सम्प्रदानकारकम्[७६६] ।।

अपादानकारकवादः

परकीयक्रिया [७६७] जन्यविभागाश्रयत्वमपादानत्वम्। 'वृक्षात्पर्णं पतती'त्यादौ [पर्णादेः [७६८]] अपादानत्ववारणाय परकीयेति। अत्र पञ्चम्या विभागजनक-त्वमन्योन्याभावप्रतियोगितावच्छेदकत्वं चार्थः। विभागेऽन्योन्याभावे चाधिकरणत्वेन [७६९] * वृक्षोऽन्वेति। तथा च वृक्ष [७७०] वृत्तिविभागजनक-वृक्षवृत्यन्योन्याभावप्रतियोगितावच्छेदकपतनाश्रयः[७७१] पर्णमिति[७७२] वाक्यार्थः[xlv]। तथा च "ध्रुवमपाये अपादान" [xlvi] मिति पाणिनि [७७३] सूत्रम्। अपाये = विभागे[७७४]$, ध्रुवं = निश्चलं प्रकृतपञ्चम्यर्थविभागजनक[७७५]त्वान्वयिक्रिया[७७६]-

७६४ Dn1 स्वीकारकत्वं

७६५ Dn1, TL1 दद्यादित्यादौ

७६६ TL1, Dn3 इति सम्प्रदानकारकम् #इति नास्ति।#, Dn2 इति सम्प्रदानम् #इति।#

७६७ TL1,Dn3 परकयाक्रिया, Dn1 परक्रिया

७६८ Dn1 पत्रादे

७६९ TL1 च #इति नास्ति।#, Dn1,Dn3 च

* #आधेयत्वेनेति भाव्यमिति भाति।#

७७० Dn1 वृक्ष- #इति नास्ति।#

७७१ Dn3 पलनाश्रयः, Dn1 अनाश्रयः

७७२ TL1,Dn3,Dn2 पत्रमिति

७७३ Dn1,Dn2 पाणिनि #इति नास्ति।#

७७४ Dn2 विभागे #इति नास्ति।#

शून्यमिति [७७७] तदर्थः। 'धावतोऽश्वात् [७७८] पतती'त्यदौ [xlvii] अश्वादेः पुरुषनिष्ठविभाग[७७९]हेतुक्रियावत्वेऽपि प्रकृत[७८०] पञ्चम्यर्थविभागजनकत्वान्वयिनी या [७८१] पतनक्रिया तच्छून्यत्वमव्याहतमेव [७८२] । स्पन्दजन्यविभागाश्रयत्वेन वृक्षादेरपादानत्वे 'वृक्षात्पर्णं स्पन्दत' [७८३] इत्यपि [७८४] स्यात् अतः क्रियेति सकर्मक[७८५]धात्वर्थपरम्।

'व्याघ्राद्बिभेती'त्यादौ पञ्चमी नापादानत्वे; किन्तु हेतुत्वे इत्यग्रे वक्ष्यते। धात्वर्थतानवच्छेदकत्वेन विभागो विशेष्यः। तेन 'वृक्षं त्यजति खग' इत्यादौ [७८६]वृक्षादेर्नापादानत्वम्। यत्तु विभागावच्छिन्न[-१]क्रिया [त्यज्यर्थः/त्यज् धात्वर्थः[७८७]]। तथा च विभागे विभाग[१-] विशिष्टक्रियाजन्य[७८८]त्वाभावान्न[७८९] दोष

$ Dn3 अत्र समाप्यते।
७७५ TL1 -कृत्य- #इत्यधिकम्।#
७७६ TL1 -न्वयि निपातन क्रिया न, Dn1 क्रियाः
७७७ TL1 -शून्यत्वमिति
७७८ Dn1 धातोः स्वात्
७७९ Dn1,TL1 -तद्विभाग-
७८० Dn2 प्रकृति
७८१ Dn1,TL1 -न्वयनीया
७८२ TL1 एव #इति नास्ति।#, Dn2 -व्यवहतस्पन्द-
७८३ TL1 स्पन्दते
७८४ Dn2 अपि #इति नास्ति।#
७८५ TL1 सकर्मक- #इति नास्ति।#, Dn2 क्रियापदम् #इत्यधिकम्।#
७८६ Dn2 वृक्षस्य र्नापादा-
-१ TL1 क्रियया त्यजर्थतया विभागे विभाग-, Dn2 क्रिययास्त्यजद्यात्त्वर्थतया विभाग-
७८७ Dn1 त्यजर्थः
१-

इति। तन्न। तर्हि अधः[७९०]संयोगावच्छिन्नक्रियायाः एव[७९१] पतत्यर्थतया [-२]वृक्ष पर्णविभागेऽधःसंयोगविशिष्टक्रियायाः अजनकत्वात्[२-] असम्भवापत्तेः। विभागे फलोपलक्षितव्यापार[७९२]जन्यत्वं त्वुभयत्र [७९३]तुल्यमिति दिक्।।

'वृक्षाद्विभजत' इत्यादौ अवधित्वमपादानत्वम्[७९४]। अवधित्वं[७९५] स्वरूपसम्बन्धरूपं[७९६] पञ्चम्यर्थः। अपाये विभागे ध्रुवमवधिभूतमपादानमिति[७९७] पाणिनिसूत्रार्थः। तथा च वृक्षनिष्ठावधितानिरूपकविभागाश्रयः पर्णमित्युक्त-वाक्यार्थः। न चैवं 'स्वं[७९८] स्वस्माद्विभजत' इत्यपि[७९९] स्यात्। प्रति-योगिकत्व[८००] विशिष्टसंयोगस्येव[८०१] स्वावधिकत्व[८०२] विशिष्टविभागस्यापि

---

७८८ Dn1 क्रियाजन्य- #इति आवर्तनम्।#
७८९ TL1 अत्र #इत्यधिकम्।#
७९० TL1 यतः, Dn1 धात्वर्थ
७९१ Dn1,TL1 एव #इति नास्ति।#
-२ Dn1,TL1 वृक्ष.........अजनकत्वात् #पर्यन्तं नास्ति।#
२-
७९२ Dn2 -जनकत्वमुभयत्र
७९३ Dn1 तु #इति अक्षरलोपः।#
७९४ Dn1 विभागावच्छिन्नत्वमपादानत्वम्
७९५ Dn1 अवच्छिन्नत्वं
७९६ Dn1 सम्बन्धित्वरूप-
७९७ TL1, Dn2 -दानमित्यपि
७९८ Dn1 स्वं #इति नास्ति।#
७९९ Dn1 न #इत्यधिकम्।#
८०० Dn1,TL1 स्वप्रतियोगित्व-
८०१ Dn2 -स्यैव
८०२ Dn1 स्वावधित्व-

स्वस्मिन्नभावात्। इत्थं चापादानपदं[८०३] पञ्चमीपदं[८०४] च[८०५] नानार्थकमेवेति[८०६] बोध्यम्। 'धावतोऽश्वात्पतती'[८०७]त्यादावपि अवधित्वमेव[८०८] पञ्चम्यर्थ इति कश्चित्[८०९]।।

'व्याघ्राद्बिभेति', 'शत्रोः परित्राती'त्यादौ[८१०] पञ्चमी नापादाने। किन्तु "भीत्रार्थानां भयहेतु"[xlviii]रिति सूत्रेणानुशिष्ट[८११] हेतुत्वार्थिका[८१२]। धातोश्च यथायथं भयं भयाभावश्चार्थः। पञ्चम्यर्थहेतुत्वं धात्वर्थभये[८१३] धात्वर्थतावच्छेदकभये[८१४] चान्वेति। आश्रयत्वं व्यापारश्च[८१५] यथा-यथमाख्यातार्थः। तथा च व्याघ्रहेतुकभया[८१६]श्रय इत्याद्यस्य, शत्रुहेतुकभयाभावा[८१७]नुकूलव्यापारवानित्यंतस्यार्थः[८१८]। इत्थं च[८१९] हेतु[८२०]पञ्चम्यैवोपपत्तौ[८२१] पृथक् सूत्रं प्रपञ्चार्थमिति[८२२] बोध्यम्।।

---

८०३ TL1 चाभावपदं, Dn1 चापादान-
८०४ Dn1 पञ्चमी, Dn2 पञ्चमीपद-
८०५ Dn2 च #इति नास्ति।#
८०६ TL1 नानार्थमेवेति, Dn2 नानार्थमेव
८०७ Dn1 धातोस्वात्पतती
८०८ Dn1 अवच्छिन्नत्वमेव
८०९ TL1 इत्यपि कश्चित्, Dn2 इति कश्चित् #इति नास्ति।#
८१० TL1 परित्रायत इत्यादौ, Dn2 पराजयत इत्यादौ
८११ Dn2 -सृष्ठ-
८१२ TL1 -हेत्वर्थिका
८१३ TL1 धात्वर्थे
८१४ Dn1 धात्वर्थाभये चान्वेति, Dn2 धात्वर्थतावच्छेदके चाभयेऽन्वेति
८१५ Dn1 व्यापाराश्रय-
८१६ Dn1 -हेतुकतया-
८१७ Dn2 -अभाव- #इति नास्ति।#

एवं [८२३] 'कूपादन्धं वारयती'त्यादौ पञ्चम्या [८२४] अधःसंयोगानुकूलक्रिया [८२५] पतनं, [८२६] द्वितीयायाः [८२७] धात्वर्थ [८२८] व्यापारान्वितवृत्तित्वं धातोर्विरोधि [८२९] व्यापारोऽर्थः। तथा चान्धवृत्तिकूपनिष्ठा [८३०] धः[-१]संयोगानुकूलक्रियाविरोधिव्यापारविषयक[१-]कृतिमानिति वाक्यार्थः [-२]संपद्यते। स च इत्यधिकम्[२-] न युक्तः। यत्र हि त्रिक्षणावस्था [८३१] यिनि खण्डे [८३२] कूपे परमाण्वादेरधः [८३३] संयोगे [८३४] मानाभावेनासिद्धिः [८३५] तत्रासंभवात्। अत एव

---

८१८ TL1 -वानित्यस्यार्थः, Dn1 -वानित्यर्थः
८१९ Dn1 व्याघ्र- #इत्यधिकम्।#
८२० Dn2 हेतु- #इति नास्ति।#
८२१ Dn2 अपि #इत्यधिकम्।#
८२२ TL1 सूत्रमिति, Dn1 पञ्चार्थमिति
८२३ TL1 एवं #इति नास्ति।#
८२४ Dn2 अवधित्वमधःसंयो-, Dn1 आधसंयो-
८२५ TL1 रूपं, Dn2 रूप
८२६ TL1 पतनं, Dn1 पतन-
८२७ TL1,Dn2 द्वितीयाया
८२८ Dn2 धात्वर्थैकदेश प्रतिबन्धान्वित-
८२९ Dn2 प्रतिबन्धानुकूलव्या-
८३० Dn1,Dn2 निष्ठा #इति नास्ति।#
-१ Dn2 कूपावधिक पतनप्रतिबन्धानुकूल व्यापारानुकूल-
१-
-२ Dn1,TL1 संपद्यते। स च इत्यधिकम् #इति नास्ति।#
२-
८३१ Dn1,TL1 त्रिक्षणस्था-
८३२ Dn2 खण्डकूपे
८३३ Dn1 परमाण्वादेरण्यधः
८३४ TL1, Dn2 संयोगो
८३५ Dn2,TL1 सिद्धः

द्वितीयायाः पतनं पञ्चम्याः धात्वर्थतावच्छेदकाभावा [८३६] न्वयिवृत्तित्वं धातोरभावानुकूलव्यापारोऽर्थः [८३७] । तथा च कूपवृत्त्यन्धपतनाभावानुकूलव्यापारविषयक [८३८] [-२]कृतिमानिति वाक्यार्थोऽप्यपास्तः[२-]। यत्रान्धस्य [८३९] पतनमप्रसिद्धम्, तत्रासंभवात्। किन्तु धातोर[८४०]भावानुकूलव्यापारः, पञ्चम्याः वृत्तित्वं, द्वितीयायाः[८४१] प्रतियोगित्वमनुयोगित्वं वा[८४२] धात्वर्थतावच्छेदकीभूताभावान्वित [८४३] मर्थः [८४४] । अभावश्च कूपादिसमभिव्याहारात् [८४५] पतनादिना तज्जन्याधःसंयोगादिना वा सम्बन्धेन बोध्यः[८४६]। तथा च पतनादिसम्बन्धेन[८४७] कूपवृत्त्यन्धप्रतियोगिकाभावानुकूलव्यापारविषयक [८४८] कृतिमानिति वाक्यार्थः। एवमेतस्मा'त्सविषदन्नान्मित्रं [८४९] वारयती'त्यादौ [८५०] यत्र [८५१] सविषान्ने [८५२]

---

८३६ Dn1 -वच्छेदकान्वयि-
८३७ Dn2 -व्यापारः
८३८ Dn1 -विषय-
-२ Dn2 -यत्नवानिति वाक्यार्थोऽपि न युक्तः, TL1 -यत्नवानित्यर्थोऽप्यपास्तः।
२-
८३९ Dn1 पदान्धस्थ-, Dn2 यदन्धस्य-
८४० TL1 -रेव
८४१ Dn2 द्वितीया
८४२ Dn1 बा, Dn2 वा #इति नास्ति।#
८४३ TL1 -दकाभावान्वित-, Dn1 -दको भूताभावान्वित-
८४४ Dn1 -न्वितत्वमर्थः।
८४५ TL1 -व्यवहारात्, Dn1-व्याहात्
८४६ Dn1,TL1 बोध्यः #इति नास्ति।#
८४७ Dn1,TL1 पतनादिसम्बन्धेन #इति नास्ति।#
८४८ TL1, Dn2 यत्नवानिति
८४९ TL1 विषान्नादिदं मित्रं, Dn1 विषादमुं मित्रं
८५० TL1 वारयन्तीत्यादौ

मित्रस्य [८५३] भोजनमप्रसिद्धम्[८५४], तत्राऽपि भोजनादि[८५५]सम्बन्धेन सविषान्न-वृत्ति[८५६]मित्रप्रतियोगिकाभावानुकूलव्यापारविषयक[८५७] कृतिमानित्यन्वयधीः।

परे तु 'कूपादन्धं वारयती'त्यत्र[८५८] [-१]सविषान्नादमुं मित्रमित्यत्र च[१-] धातोः पतनमाद्ये[८५९], द्वितीये भोजनम्, [८६०]उभयत्राभावानुकूलव्यापारश्चार्थः[८६१]। पञ्चम्याः आद्ये अवच्छिन्नत्वं द्वितीये कर्मत्वम्[८६२], उभयत्र द्वित्वं चार्थः[८६३]। द्वितीयायाश्च कर्तृत्वमर्थः। धात्वर्थतावच्छेदकीभूतेऽभावे [८६४] धात्वर्थ-पतनादेरधिकरणत्वेन, द्वित्वावच्छिन्नस्य [८६५] पञ्चम्यर्थद्वितीयार्थो [८६६] भयस्य प्रतियोगित्वेनान्वयः व्युत्पत्तिवैचित्र्यात्। तथा च पतनसामान्ये यः

---

८५१ TL1,Dn2 यत्सविषान्नस्य
८५२ Dn2 यन्मित्रस्य
८५३ TL1,Dn2 च #इत्यधिकम्।#
८५४ Dn1 भोजनप्रसिद्धम्
८५५ TL1, Dn2 भोजनसम्बन्धेन
८५६ Dn1 सविषान्नादिवृत्ति-
८५७ Dn1,TL1 विषय-
८५८ Dn1 वारयतीत्यत्र #इति नास्ति।#
-१ TL1 सविषान्नादिदं वारयतीत्यत्र च, Dn2 सविषान्नाद्धातोरुभयत्र मित्रं वारयतीत्यत्र च
१-
८५९ TL1 पतनं पञ्चम्याद्ये, Dn2 पतनमाद्ये
८६० Dn2 उभयत्र #इति नास्ति।#
८६१ Dn1 -व्यापारश्च, Dn2 -व्यापारश्चोभयत्रार्थः
८६२ TL1 कर्म
८६३ TL1 व्यर्थ
८६४ TL1, Dn2 -भूताभावे
८६५ Dn2 -च्छिन्नत्व-
८६६ Dn2 -यार्थ कर्तृत्वोभयस्य

कूपावच्छिन्नत्वान्ध [८६७] कर्तृकत्वोभयाभावः [८६८] तदनुकूलव्यापारविषयक-यत्नवानित्याद्यस्य[८६९], भोजनसामान्ये यः[८७०] सविशेषान्नकर्मकत्व[८७१] [मित्र]⁻ [२]कर्तृकत्वोभयाभावस्तदनुकूलव्यापारविषयक[२-]यत्नवानिति द्वितीयस्यार्थः।

'आकाशं न पश्यती' 'घटश्चैत्रो वे'त्यदौ [८७२] द्वितीयायाः [८७३] विषयत्वं, लक्षणया घटादि वृत्तित्वं च[८७४] बोध्यते। धातुना लौकिकविष-यत्वावच्छिन्नं चाक्षुष[८७५]प्रत्यक्षम्। [८७६] तथा च लौकिकचाक्षुष[८७७] प्रत्यक्षसामान्ये य आकाश-विषयत्व[८७८]घटादिवृत्तित्वोभयाभावस्तत्प्रतियोगिता[८७९]निरूपको घट इत्यर्थः। आकाश[८८०] विषयकचाक्षुषोपनीतभानेऽपि लौकिकविषयत्वावच्छेदेना-

---

८६७ TL1 –न्नान्धकर्तृक-
८६८ Dn2 उभयप्रतियोगिकाभावानुकूल-
८६९ Dn1 यत्नवानित्याद्य-, Dn2 विषयकत्ववानित्याद्यस्य
८७० Dn2 -सामान्ये
८७१ TL1 सविषकर्मकत्वमित्यत्र, Dn2 सविषान्नकर्मकत्वमित्यत्र
२-
८७२ TL1 चैत्रोपेत्यदौ, Dn1 चैत्रोऽपीत्यदौ
८७३ Dn2 द्वितीया विषयित्वं
८७४ Dn2 च #इति नास्ति।#
८७५ Dn1 चाक्षुष- #इति नास्ति।#
८७६ Dn2 तत्रैवावच्छिन्नावच्छिन्नद्वितीयार्थान्वित नञर्थस्यान्वयः। आख्यातस्य तादृशोभयाभावान्वितनिरूपितत्वमर्थः । #इत्यधिकम्।#
८७७ Dn1 चाक्षुष- #इति नास्ति।#
८७८ Dn2 -विषयित्वं
८७९ Dn1,TL1 -प्रतियोगि-
८८० TL1, Dn2 आकाशादि-

काश[८८१]विषयत्व[८८२]चैत्रवृत्तित्वोभयाभावसत्वान्न दोषः। एवमन्यत्रा[८८३]प्यप्रसिद्ध-स्थले बोध्यमित्याहुः।

'हिमवतो गंगा प्रभवती'त्यादौ पञ्चम्याः हेतुत्वं, धातोरुत्पत्तिरर्थ -[३]इति न युक्तम्। तर्हि[३-] "जनिकर्तुः"[xlix] इत्यत एवोपपत्तौ[८८४] "भुवः[८८५] प्रभवः[1]" इति सूत्रवैय्यर्थ्यप्रसङ्गात्[८८६]। किन्तु प्रकर्षेण भवनं प्रकाशः[८८७] आद्यबहिःपदार्थः[-१][संयोगरूपः[८८८]] भूधात्वर्थः। [बहिः पदार्थः]प्रकृते भूखण्डः। पञ्चम्यर्थः[१-] संयोगध्वंसा[८८९]व्यवहितोत्तरक्षणवृत्तित्वम्। आख्यातार्थः आश्रय-त्वम्। तथा च हिमालयसंयोगध्वंसाव्यवहितोत्तरक्षणवेत्त्याद्य[८९०]पृथिवीसंयोगा-श्रयत्ववती[८९१] गंगेत्यर्थः। 'वैकुण्ठात्काशीतो वा[८९२] गंगा प्रभवती'त्यप्रयोगात्

---

८८१ Dn2 -विषयित्वावच्छिन्नाकाश-

८८२ Dn2 विषयित्व-

८८३ Dn2 अपि #इति नास्ति।#

-३ TL1 इत्ययुक्तम् तर्हि, Dn1 इत्युक्तम्

३-

८८४ Dn1,TL1 एवोत्पत्तौ

८८५ TL1 भवः

८८६ Dn1 सूत्रवैय्यर्थ्यात्।, Dn2 वैय्यर्थ्य प्रसङ्गात्।

८८७ TL1 प्रकाशनं

-१ TL1 -संयोगरूपे धात्वर्थो बहिः पदार्थः।, Dn2 -संयोगरूपः। स च धात्वर्थः। बहिः सर्वः प्रकृतेः स एव पञ्चम्यर्थः।

८८८ Dn1 संयोगो

१-

८८९ TL1 -ध्वंस- #इति नास्ति।#

८९० TL1 -वृत्याद्य-, Dn1 अक्षरलोपः

८९१ TL1 -त्ववत-

अव्यवहितेति। आद्येति च वैकण्ठसंयोगध्वंसाव्यवहितोत्तरक्षणे भू[८९३]सम्बन्धस्य काशीसंयोगध्वंसा[८९४] व्यवहितोत्तरक्षणे आद्यस्य[li] तस्याभावात् अदोषः[८९५]। [lii]"वल्मीकाग्रात्प्रभवति[८९६] धनुःखण्डमाखण्डलस्ये"त्यादावप्येवमेव। तत्र हि बहिः[८९७]पदार्थो वल्मीकाग्रोर्ध्वदेश इति विशेषः।

'कृष्णात्पराजयते शिशुपालः'[८९८] 'अध्ययनात्पराजयते बाल' इत्यादौ [८९९]धातोरसहिष्णुता[९००]। पञ्चम्याः[९०१] कर्मत्वम्, आख्यातस्याश्रयत्वमर्थः[९०२]। 'श्रीकृष्णं न सहते', 'अध्ययनं न सहते' इति विवरणात्[९०३]। असहिष्णुता च द्वेष[९०४] विशेषः[९०५] अभिभवाशक्यत्वज्ञानं[९०६] वा। तथा च [liii] श्रीकृष्ण[९०७] -

---

८९२ TL1 वा गंगा #इति नास्ति।#
८९३ Dn2 क्षण
८९४ TL1, Dn2 -ध्वंसा- #इति नास्ति।#
८९५ Dn1 दोषः
८९६ TL1 काग्रात्प्रभवति, Dn1 काग्रात्द्यभवति
८९७ Dn1 वहिः,Dn2 तर्हि
८९८ Dn2 शिशुपालः #इति नास्ति।#, Dn1 चित्र उपालः
८९९ TL1 इत्यादावधातोः
९०० TL1 -ष्णुता, Dn1 -ष्टता
९०१ TL1 पञ्चम्यर्थः।
९०२ Dn1,TL1 -श्रयतार्थः
९०३ TL1 वरणात्
९०४ Dn1,Dn2 -ष्णुतावद्दोष
९०५ Dn2 विशेषः #इति नास्ति।#
९०६ Dn1,TL1 अभिभावाशक्यत्वज्ञानं
९०७ Dn2 -विषयकभिन्नाभिभावा-

विषयकाभिभवाशक्यत्वज्ञानवानित्याद्यस्य, [liv] अध्ययन [१०८] विषयकाशक्यत्व- [१]ज्ञानवान् बाल इत्यन्तस्यार्थः[१-]।

[१०९] 'विप्राद् धनमादत्त' इत्यादौ [-२]पञ्चम्याः यथेष्ट [११०] विनियोगो अर्थः[२-]; न तु स्वत्वम्। चोरात्धनमादत्त इत्यादौ चोरस्य स्वत्वाभावेन[१११]- तदसंभवात्। धातोरपि यथेष्टविनियोगफलकस्वीकारोऽर्थः [११२] ; न तु स्वत्वजनकस्वीकारः। 'विप्रात्धनमादत्ते चोर' इत्यादौ [११३]चोरस्य तदसंभवात्। पञ्चम्यर्थश्च विनियोगो अव्यवहितोत्तरत्वसम्बन्धेन धात्वर्थतावच्छेदक [११४] विनियोगेऽन्वेति। अव्यवहितोत्तरत्वं च स्वसमानविषयक[११५]पुरुषान्तरीयविनि- योगव्यवहितभिन्नत्वम्। तेन 'शूद्रतः प्रतिग्रहीत्रा'[११६] 'विप्रेण दत्तं धनमाद[त्ते

---

१०८ Dn1 -विषयकाभिभावाशक्यत्व-
-१ TL1 -ज्ञानवानित्यस्यार्थः, Dn1 -ज्ञानं वा नित्यं त्यस्यार्थः
१-
१०९ Dn2 विशद्धनमादत्ते
-२ Dn2 -स्वत्वाभावेन पथवृत्तिनियोगोऽर्थो
११० TL1 यथेच्छ-
२-
१११ TL1 स्वत्वाभावेनासंभवात्
११२ TL1 -स्वीकाराऽर्थो
११३ TL1 चोरस्य #इति नास्ति।#
११४ TL1 -वच्छेदकत्वे
११५ TL1 -विषय पुरु-
११६ TL1 प्रतिगृहीत्रा, Dn1 प्रतिगृहीत्वा-

शूद्रात्[११७]]' इति न प्रयोगः। इत्थं च विप्राय[११८] यथेष्टविनियोगाव्यवहितोत्तरधनवृत्तियथेष्टविनियोग[११९]फलकस्वीकारवानित्यर्थः।

'अधर्माज्जुगुप्सत'[१२०] इत्यत्र [१२१]पञ्चम्याः कर्मत्वं, धातोर्निन्दार्थः[१२२]। तथा च [अधर्मं निन्दतीत्यर्थः[१२३]]। अधर्माद्विरमतीत्यत्र[१२४] धातोः करणानन्तरमकरणमर्थः[१२५]। पञ्चम्याः कर्मत्वमर्थः। स च[१२६] करणेऽकरणे चान्वेति[१२७]। तथा च अधर्मं कृत्वा पुन[१२८]र्न करोतीत्यर्थः। 'धर्मात्प्रमाद्यती'त्यादौ[१२९] पञ्चम्याः विषयत्वं,[१३०] धातोरनवधानम् आख्यातस्याश्रयत्वमर्थः। तथा च[१३१] [१३२]धर्मविषयकावधानाभावाश्रय इति वाक्यार्थः।

---

११७ TL1 धनमादत्तरि शूद्रादादत्त-, Dn2 धनमादातरि शूद्रादादत्त-, Dn1 त्तशूद्राधत्ते
११८ TL1 विप्राय यथेष्ठ, Dn2 विप्रः यथेष्ठ
११९ Dn2 -फलस्वीकार-
१२० TL1 अधर्माज्जुगुप्स्यत, Dn1 अधर्माज्जिगुप्सत
१२१ TL1,Dn2 पञ्चम्यर्थः
१२२ TL1 धातोर्निन्दार्थः, Dn1 अतो निन्दार्थः
१२३ Dn1 धर्मान्निन्दतीत्यर्थः
१२४ TL1 अधर्माद्विरमतीत्यादौ, Dn1 अधर्माद्विरयतीत्यादौ
१२५ Dn1 करण
१२६ Dn1 सदा
१२७ TL1 चेति
१२८ Dn1 चाधर्मपुन-
१२९ Dn1 धर्मत्वमाद्यतात्यादौ
१३० Dn2 धातोरनवधानताख्यातस्य
१३१ TL1, Dn2 तथा च #इति नास्ति।#
१३२ Dn2 धर्माविषय-

‘उपाध्यायादन्तर्धत्ते शिष्य’ इत्यादौ धातोः स्वविषयकप्रत्यक्षविरोधि[१३३]व्यापारः, पञ्चम्याः सम्बन्धित्वं धात्वर्थतावच्छेदकप्रत्यक्षान्वितम्, आख्यातस्य कृतिरर्थः। तथा च [१३४] उपाध्यायसम्बन्धिस्व [१३५] विषयक [१३६] प्रत्यक्षविरोधिव्यापारानुकूलकृतिमान् शिष्य[१३७] इति वाक्यार्थः[lv]।

‘दण्डाद् घटः’, [१३८]’धूमाद्वन्हिमानि’त्यादौ पञ्चमी नापादाने, क्रियायोगाभावात्; किन्तु [१३९] जनकत्वज्ञापकत्वरूपे [१४०] हेतुत्वे वा [१४१] [१४२] जन्यत्व-[ज्ञाप्य [१४३]]त्वरूपे हेतुमत्वे [१४४] वा “हेता”विति सूत्रेणानुशिष्टा। न चैवं “जनिकर्तुः [१४५] प्रकृति”रिति सूत्रं [१४६] व्यर्थम्, काष्ठात्पचतीत्यत्रेव [१४७]

---

१३३ Dn2 -विरोध व्यापारः
१३४ Dn1,TL1 तथा च #इति नास्ति।#
१३५ Dn2 सम्बन्धित्व-
१३६ TL1 स्वविषय प्रत्यक्ष-
१३७ TL1, Dn2 शिष्य #इति नास्ति।#
१३८ TL1 धर्माद्वग्नि-
१३९ TL1 तेन कर्मत्व ज्ञापक-
१४० TL1,Dn2 -रूप हेतुत्वे
१४१ Dn2 वा #इति नास्ति।#
१४२ TL1 जन्यत्वपात्वरूपं, Dn2 रूपे #इति नास्ति।#
१४३ Dn1 व्याप्य
१४४ Dn1 हेतुत्वे
१४५ TL1 प्रकृति #इति नास्ति।#
१४६ Dn2 सूत्र #इति नास्ति।#
१४७ TL1 एव #इति नास्ति।#

'दण्डाज्जायत' [९४८] इत्यादावप्युत्पत्तिनिरूपित [९४९] हेतुत्वार्थकपञ्चम्याः "हेता"विति सूत्रेणैव संभवादिति वाच्यम्।

[९५०] उत्पत्तेरहेतुकत्वेऽपि सावधिकत्वव्यवहारादुत्पत्तिरूपधात्वर्थ [९५१] -पदार्थनिरूपितस्वरूपसम्बन्धस्य [९५२] हेतुत्वानात्मकतया हेताविति सूत्रेण [९५३] तदर्थकपञ्चम्याः असम्भवादिति। ।। इत्यपादानकारक[म्] समाप्त[म्][९५४] ।।

अधिकरणकारकवादः

[-१]अधिकरणत्वं च न धर्मसम्बन्धः[१-], संयोगादिरूपसम्बन्धस्य [९५५]द्विष्ठतया बदरादेरपि कुण्डाद्याधारतापत्तेः। न च [९५६] स्वधर्मसम्बन्धोऽधि-करणत्वम्, कुण्डा[दिकं न बदरादेर्धर्म [९५७]] इति वाच्यम्। स्वधर्मत्वस्य

---

९४८ TL1 -द्वाज्जातयत, Dn1 दण्डाज्जीयते
९४९ Dn2 -निरूपिते
९५० TL1 उत्पत्तेरहेतुत्वेऽपि, Dn2 उत्पत्तेः सहेतुत्वेऽपि
९५१ TL1 व्यवहारादुत्पत्तिरूप धात्वर्थ, Dn1 व्यवहारानुत्पत्ति
९५२ TL1 अहेतुत्वा-
९५३ Dn2 सूत्रेणैतर्थक-
९५४ Dn1 इत्यपादानकारकः समाप्तः, TL1,Dn2इत्यपादानकारकम् समाप्तम् #इति नास्ति।#
-१ Dn2 अधिकरणञ्च स्वधर्मसम्बन्धसं-
१-
९५५ TL1, Dn2 द्विनिष्ठतया
९५६ Dn1 निच-
९५७ TL1 कुण्डादिकञ्चन बदरादि धर्म-, Dn2 कुण्डादिकञ्च न बदरादिधर्म-, Dn1 कुण्डादिकनवदिरादेर्धर्म-

स्वाधेयता[९५८] रूपतया स्वाधेयत्वस्य[९५९] स्वनिष्ठाधिकरणतानिरूपकत्व[९६०]-रूपत्वेनान्योन्याश्रय[९६१]प्रसङ्गात्। नाप्युत्पत्तये स्थितये[९६२]ज्ञप्तये चापेक्षणीयम्[९६३] अधिकरणम्। उत्पत्तयेऽपेक्षणीयं कार्यस्य समवायिकारणम्। स्थितये घटादेर्भूतलादि। ज्ञप्तये जात्यादेः समवायी, समवायादेः स्वरूपसम्बन्ध[९६४] इति वाच्यम्। अपेक्षणीयत्वस्य कारणत्वरूपत्वेऽसमवायि[९६५]कारणादावतिव्याप्तेः[९६६]। समवायिकारणत्वं तु[९६७] घटत्वादि[९६८]ज्ञप्तये घटादौ न संभवति।

[lvi] नापि तद्भिन्नत्वे सति [तत्पत][९६९] नप्रतिबन्धक[९७०] संयोग-वन्मूर्तत्वम्[९७१]। पतनवन्मूर्तस्याधिकरणत्वम्[९७२]। ब्रह्माण्डादिधारकसंयोगा-श्रयेश्वर[९७३]वारणाय मूर्तत्वमुपात्तम्। [-१]पतनशून्यमूर्तस्य तु[१-] विलक्षणतत्संयोगा-

---

९५८ TL1, Dn2 स्वाधेयत्वरूप-
९५९ TL1 स्वाधेयत्व-, Dn2 आधेयत्वस्य च
९६० Dn1 स्वात्मकाधिकरणता सम्बन्धित्व-
९६१ Dn1 -सप्रसङ्गात्
९६२ TL1 स्थितयज्ञप्रप्रे-, Dn1 स्तितयज्ञप्तये
९६३ Dn1 अधिकरणत्वम्
९६४ Dn2 सम्बन्धीति
९६५ Dn2 कारणस्वरूपत्वेनासमवायि
९६६ Dn1 व्याप्तिः
९६७ Dn2 तु #इति नास्ति।#
९६८ Dn1 घटात्वादिज्ञप्तौ
९६९ Dn2 तत्पतनं
९७० Dn2 -बन्धक- #इति नास्ति।#
९७१ Dn2 -संयोगवनमूर्तत्वमधिकरणत्वम्।
९७२ Dn2 -मूर्ताधिकरणस्य
९७३ Dn1 -घटकेश्वर-
-१ Dn2 मूर्तमात्रस्य

दिमत्वम्[१७४]। तेन कस्यचित्पतनाप्रसिद्धावपि[१७५] नाव्याप्तिः। गुणादेस्तत्समवायित्वं समवायादेस्तत्स्वरूपसम्बन्धित्वम्। एवं [-२]परम्परासम्बन्धेनापि वक्तव्यमिति[२-] वाच्यम्। अननुगमात्[१७६]। सप्तम्याः [१७७]नानार्थत्वस्यान्याय्यत्वात्। किन्तु प्रतियोगित्वादिवत्[१७८] अधिकरणमितिकारकप्रतीति[१७९] साक्षिकमधि[३]करणत्वं स्वरूपमतिरिक्तं[३-] वेत्यन्यदेतत्। एवमाधेयत्वमपि[१८०] वाच्यम्[१८१]। इत्थं च 'गेहे[१८२] स्थाल्यामोदनं पचती'त्यादौ पच्यर्थोऽधः[१८३] संतपनम्। अधोवह्निसंयोगानुकूलकाष्ठाग्न्यादि[१८४]व्यापार इत्येके। पच्यर्थोऽग्नि[१८५][१८६] संयोग एव। पाकजं[१८७] रूपमित्यादिव्यवहारादित्यन्ये। उभयथापि[१८८] गेहादेः

१-
१७४ Dn2 -मत्वेन
१७५ Dn1 -प्रतिबद्धावपि
-२ Dn2 परंपरेति
२-
१७६ Dn2 -गमनात्
१७७ Dn2 नानार्थत्वेचान्याय्य-
१७८ Dn1 अधिकरण-
१७९ Dn2 -साक्षिकः
-३ Dn2 स्वरूपसम्बन्धविशेषे चातिरिक्तं,अतिरिक्तोवेत्यन्य-
३-
१८० Dn1 आधेयत्वत्वमपि
१८१ Dn2 वाच्यम् #इति नास्ति।#
१८२ Dn2 गृहे
१८३ Dn1 पच्यार्थः
१८४ Dn2 -काष्ठावह्न्यादेर्व्यापार-
१८५ Dn1 पच्यार्थो
१८६ Dn2 विक्लित्यवच्छिन्नाग्नितण्डुलादि #इत्यधिकम्।#
१८७ Dn2 पङ्कज-

साक्षात्तदधिकरण [९८९] त्वासंभवात्। कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्व [९९०] -रूपक्रियाधिकरणत्वं सप्तम्यर्थः। तदाहुः -

कर्तृकर्मव्यवहि[तामसाक्षात्धारयत् क्रियाम्।[९९१]]

उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं[९९२] स्मृतम्।।

वस्तुतस्तु [९९३] परम्परया [९९४] क्रियाश्रयत्वमात्रं सप्तम्यर्थः। अत एव प्राङ्गणस्थले[९९५] दीर्घ[९९६]दण्डादिना[९९७] काष्ठादिचालनद्वारा गृहमध्ये पाककरणे गृहस्य कर्तृद्वारा क्रियानाश्रयत्वेऽपि 'गृहे पचती'ति प्रयोगः। [वह्निचैत्रादेः [९९८]] साक्षात्पाकगमनादिक्रियाश्रयत्वेऽपि 'वह्नौ पचती'ति [९९९] 'चैत्रे [१०००] गच्छती' [१००१] त्यप्रयोगात्परम्परयेत्युक्तम्। न चैवं क्रियाश्रयत्वस्यैव

---

९८८ Dn2 उभयत्रापि

९८९ Dn1 -त्वाभावात्तण्डुलाकर्तृत्व कर्मत्वान्यतर-

९९० Dn2 स्वरूपाधिकरणत्वं

९९१ Dn2 ताम् साक्षाद्धारयति क्रियाम्।, Dn1 ताम् साक्षात्कारय क्रियाम्।

९९२ Dn1 शाखेऽधिकरणं स्मृतिरिति।।

९९३ Dn2 वस्तुतः

९९४ Dn2 क्रिया- #इति नास्ति।#

९९५ Dn2 -स्थेन

९९६ Dn2 दीर्घ- #इति नास्ति।#

९९७ Dn2 -ना #इति नास्ति।#

९९८ Dn1 वह्निश्चैत्रादे

९९९ Dn2 इति #इति नास्ति।#

१००० Dn2 चैत्रो

१००१ Dn2 -तीत्याद्यप्रयो-

सप्तम्यर्थत्वे [१००२] क्रियायोगं [१००३] विना 'भूतले घट' इत्यदिप्रयोगो [१००४] न स्यादिति वाच्यम्। इष्टत्वात्। न हि क्रियारहितं वाक्यमस्तीति शाब्दिकाः।

वस्तुतोऽ [१००५] धिकरणत्वमात्रमाधेयत्व [१००६] मात्रं वा सप्तम्यर्थः। [क्रियांशस्यान्यलभ्यत्वात्[१००७]]। [१००८]स च यत्र[१००९] क्रियायामन्वेति तत्र[१०१०] कारकत्वव्यवहारः। अत एव 'भूतले घट' [-१]इत्यादिक्रियाशून्यवाक्याच्छाब्द-बोध[१-] इति नैय्यायिकाः। अत्र भूतलनिष्ठाधिकरणतानिरूपको घट इति अन्वय[१०११]बोधः। निष्ठत्वं[१०१२] निरूपकत्वं च[१०१३] संसर्ग इति प्राञ्चः।

एवं सति निरूपकत्वसम्बन्धस्य प्रतियोगितान[१०१४]वच्छेदकत्वाद् भूतले न घट[१०१५] इत्यादौ नञर्थान्वयासंभावात्[lvii] [-१]आधेयत्वम् सप्तम्यर्थः। तत्र च

१००२ Dn2 सप्तम्यर्थे

१००३ Dn2 क्रिया प्रयोगेन

१००४ Dn1 इत्यप्रयोगो

१००५ Dn2 -तो घटाधिकरण-

१००६ Dn2 -त्व #इति नास्ति।#

१००७ Dn1 क्रियाश्यन्यलम्पत्वात्

१००८ Dn2 क्रियाशक्य व्यर्थत्वात्। न

१००९ Dn2 यत्

१०१० Dn2 तस्य तत्क्रिया

-१ Dn2 इति शून्यवाक्यशाब्दबोधः।

१-

१०११ Dn1 अन्वय- #इति नास्ति।#

१०१२ Dn2 निष्ठात्वं

१०१३ Dn2 च #इति नास्ति।#

१०१४ Dn1 प्रतियोगितावच्छे-

१०१५ Dn1 पट

प्रकृत्यर्थस्य निरूपकतया प्रथमान्तस्याधिकरणतया चान्वये[१-] भूतलनिरूपिताधेयत्वाश्रयो घट इत्यन्वयबोधः[१०१६]। निरूपितत्वमाश्रयत्वं च[१०१७] संसर्ग इति तु[१०१८] नव्याः।

[१०१९] 'चर्मणि द्वीपिनं हन्ती'त्यादौ[१०२०] सप्तम्यर्थः[१०२१] निमित्तत्वम्। तच्चोद्देश्यत्वं[१०२२] फलत्वेन[१०२३] फलवत्त्वेन वे[च्छा[१०२४]]विषयत्वरूपम्। तत्राद्यं 'मशकनिवृत्तौ[१०२५] धूमं करोती'त्यादौ[१०२६] मशकनिवृत्तेः[१०२७] फलत्वात्। द्वितीयं[१०२८] 'चर्मणि द्वीपिनं हन्ती'त्यादौ चर्मादेः च[१०२९] सिद्धतया स्वत्वरूपफलवत्त्वेनैव[१०३०] इष्टत्वात्। तच्च प्रयोज्यत्वेन धात्वर्थेऽन्वेति। तथा

-१ Dn1 आधेयत्वम्....... चान्वये #पर्यन्तं नास्ति।#
१-
१०१६ Dn1 बोधः #इति नास्ति।#
१०१७ Dn2 च #इति नास्ति।#
१०१८ Dn2 तु #इति नास्ति।#
१०१९ Dn1 निमित्तत्वं #इत्यधिकम्।#
१०२० Dn1 चर्मणि द्वीपिनं हन्तीत्यादौ #इति नास्ति।#
१०२१ Dn1 अपि #इत्यधिकम्।#
१०२२ Dn2 तच्चोपदेशत्वम्
१०२३ Dn2 फलत्वेन चेच्छादि विषय-
१०२४ Dn1 वेष्टा
१०२५ Dn1 तत्राद्यमंशिकनिवृत्तौ
१०२६ Dn1 करोतीत्यादेः
१०२७ Dn1 मशकनिष्ठत्यादेः
१०२८ Dn2 द्वितीयं #इति नास्ति।#
१०२९ Dn2 च #इति नास्ति।#
१०३० Dn2 -त्वेनेच्छाविषयत्वात्

च [१०३१] मशकनिवृत्तिविषयकेच्छा [१०३२] प्रयोज्यधूमकरणाश्रयः, चर्मविषयक-स्वत्व [१०३३] प्रकारकेच्छाप्रयोज्यद्वीपिकर्मक [१०३४] हननानुकूलकृतिमानिति च [१०३५]बोधः [१०३६] । [lviii] [१०३७]'सीम्नि पुष्कलको हत' इत्यादावपि * [lix]सा च [lx]"निमित्तात्कर्मयोग" [१०३८] इत्यनुशासनात् यत्किञ्चित्कर्मप्रकारकबोधजनक -[२]धातुयोगे प्रयुज्यते। तादृशबोधजनकता च सकर्मकस्य[२-] धातोः कर्मबोधकपद [१०३९] योगेन। यथा 'द्वीपिनं हन्ती'त्यादौ अकर्मकस्य तु कर्मविशिष्ट[स्वार्थशक्त्या[१०४०]]। यथा "[१०४१]अविद्यारजनीक्षये यदुदेती"त्यादौ उदेतीत्यस्योदयगिरिशिखरमारोहतीत्यर्थात्[१०४२] । अत्र[१०४३] रजनी[१०४४]क्षयस्य

१०३१ Dn2 तथा च #इति नास्ति।#
१०३२ Dn1 मशकवृत्ताच्छा
१०३३ Dn2 -त्व #इति नास्ति।#
१०३४ Dn2 -चर्मक-
१०३५ Dn2 च बोधः #इति नास्ति।#
१०३६ Dn2 वाक्यार्थ एवं #इत्यधिकम्।#
१०३७ Dn1 सीश्नि
* पुष्कलको गन्धमृगः सीमा तस्यांडकोशक इति कोशात्। #इत्यधिकः पाठः।#
१०३८ Dn2 योगे
-२ Dn1 च सकर्मकस्य धातोः कर्म-
२-
१०३९ Dn1 -वद-
१०४० Dn2 -स्यार्थशक्त्या, Dn1-स्वार्थशक्यं
१०४१ Dn2 अ- #इति नास्ति।#
१०४२ Dn1 -शिखरमातोत्वतीत्यर्थत्
१०४३ Dn2 तत्र
१०४४ Dn1 रजना-

[सूर्यो-दयाद्यजन्यत्वेऽपि[१०४५]] निमित्तत्वं[१०४६] ज्ञानविषयत्वेनोद्देश्यतया। तेन[१०४७] लोकानां[१०४८] रजनीक्षयज्ञानार्थं[१०४९] यदुदेतीत्यर्थ इत्येके। एतद् द्वीपवृत्ति-यावद्रश्मिसंसर्गाभावविशिष्टकालस्य[१०५०] रजनीत्वात्[१०५१]। सूर्योदये तद्रश्म्यु-त्पादेन[१०५२] त[त्रा[१०५३]]गभावनाशे विशिष्टकाल[१०५४] नाशात् रजनीक्षये-च्छाप्रयोज्यत्वं सूर्योदयेऽ[१०५५]क्षतमित्यन्ये।

'शरदि पु[ष्प्य]न्ति[१०५६] सप्त[-१]च्छदः' इत्यादावुत्पत्तिरपि सप्तम्यर्थः[१-]। शरदु[त्पत्तिक[१०५७]][-१]पुष्पाश्रयाः सप्तच्छदा इति वाक्यार्थः। न [च[१०५८]] शरदुत्पत्तिकपुष्पाश्रये चम्पकादावपि तथा प्रयोगः स्यादिति वाच्यम्।

१०४५ Dn1 सूर्योदयादिजन्यत्वेऽपि, Dn2 सूर्योदयाद्यन्यत्वेऽपि
१०४६ Dn1 निमित्तत्व-
१०४७ Dn2 तेन #इति नास्ति।#
१०४८ Dn1 तोकानं
१०४९ Dn2 नार्थ मुदेतीत्यर्थ
१०५० Dn2 -विशिष्ठस्य
१०५१ Dn2 जनितत्वैत्
१०५२ Dn2 -त्पादेन तत्प्रागभाव
१०५३ Dn1 तत्याग-
१०५४ Dn2 -फल-
१०५५ Dn2 -क्षय इत्यन्ये
१०५६ Dn2 पुष्यन्ति, Dn1 पुच्छान्ति
-१ Dn2 -च्छदा इति वाक्यार्थः।
१-
१०५७ Dn1 -त्पैत्तक
-१ Dn1 पुष्पा........ सप्तच्छदस्य #पर्यन्तं नास्ति।#
१०५८ Dn2, Dn1 तु

सप्तच्छदस्य[१-] पु[ष्पा[१०५९]]श्रयत्वे लब्धे [१०६०]तुल्यवित्तिवेद्यतया[lxi] पु[ष्पे[१०६१]]-ष्वपि [१०६२] स[प्त]च्छदवृत्तित्वरूप [१०६३] लाभात्तदवच्छेदेन शरदुत्पत्तिकत्वस्य व्युत्पत्तिसिद्धत्वात्। *चम्पकादिपुष्पत्वाव [१०६४] च्छेदेन शरदुत्पत्तिकत्वाभावेन तथाप्रयोगाभावात्। [lxii]धातारेव वा [१०६५] सप्तच्छदीयपुष्पत्वेन [१०६६], लक्षणेति दिक्[१०६७]।।

सतिसप्तम्याः सामानाधिकरण्यमर्थः। गुणकर्मान्यत्वे सति सत्वादित्यादितो [१०६८] गुणकर्माऽन्यत्वे [१०६९] समानाधिकरणसत्वबोधात्। तच्च क्वचित्कालिकां क्वचिद्दैशिकम्। तत्राद्यं समानकालीनत्व[१०७०]पर्यवसन्नम्। यथा गोषु दुह्यमानास्वागतः [१०७१]। अत्र सप्तम्यर्थे समानकालीनत्वे न [१०७२]

१-

१०५९ Dn1 पुष्प्या-

१०६० Dn2 तुल्यवृत्ति-

१०६१ Dn1 पुच्छि

१०६२ Dn2 पुष्पेष्व सप्तच्छद , Dn1 पुष्पेष्वपि सत्यच्छद

१०६३ Dn2 -त्व रूप #इति नास्ति।#

* Dn1 चम्पकादिषु पुच्छत्वावच्छेदेन शरदुत्पत्तिकत्वस्य व्युत्पत्तिसिद्धत्वात्।, Dn2 चम्पकादिषु पुच्छत्वावच्छेदेन शरदुत्पत्तिकत्वस्य च व्युत्पत्तिसिद्धत्वात्। #इति वैकल्पिकः पाठः#

१०६४ Dn1 -पुच्छत्वाव-

१०६५ Dn1 स्वेवा

१०६६ Dn1 -पुच्छत्वे

१०६७ Dn2 भावे

१०६८ Dn2 सत्वादित्यता

१०६९ Dn2 कर्मन्यत्व-

१०७० Dn2 -कालीनत्वं

१०७१ Dn1 दुदुह्यमान गतो दुग्धास्वागत इत्यादौ

दोहनमात्रस्य निरूपकत्वेनान्वयः। महिष्यादिदोहनसमान[-३]कालीने तथा[३-] प्रयोगाभावात्। नापि गो[१०७३] दोहनस्य। {गो}दोहनत्वेन धातोरनुपस्थितेः। किन्तु [१०७४]गोविशेषणकर्मताविशेषणस्य [१०७५] दोहनस्य। इत्थं च तादृशगो[१०७६]-दोहनसमानकालीनातीत[१०७७]गमनानुकूलकृतिमानि[१०७८]त्याद्यार्थः।

'दुग्धास्वागत' इत्यादौ तु न[१०७९] तथा[१०८०] ब्रूमः। आगमनकाले[१०८१] दोहनस्यातीततया [-१]दोहनकालीनत्वस्यागमने बाधात्। किन्तु वर्तमानध्वंस-प्रतियोगिदोहनकर्मसु गोष्वित्यर्थात्, [१०८२] तादृशगो[१-] दोहनविशेषणध्वंसस्य[१०८३] समानकालीनत्वमागमने भासते। तथा च [lxiii]तादृशवर्तमानगोदोहन[१०८४]-

---

१०७२ Dn2 न #इति नास्ति।#
-३ Dn2 -कालीनतया
३-
१०७३ Dn1 गो #इति नास्ति।#
१०७४ Dn2 'दण्डी पुरुषो गच्छतीत्यत्र यथा परम्परया पुरुषविशेषणतापन्नदण्डसमानकालीनत्वं गमने भासते। तथा' #इत्यधिकम्।#
१०७५ Dn2 एव #इत्यधिकम्।#
१०७६ Dn1 गो #इति नास्ति।#
१०७७ Dn1 कालीना तां तु गम-
१०७८ Dn2 -निति धीः
१०७९ Dn2 न #इति नास्ति।#
१०८० Dn2 तथान्वयः।
१०८१ Dn2 काले #इति नास्ति।#
-१ Dn1 दोहनका...... तादृश गो #पर्यन्तं नास्ति।#
१०८२ Dn2 अतीतार्थे #इत्यधिकम्।#
१-
१०८३ Dn1 विशेषणस्याद्यंशस्य
१०८४ Dn1 -गोदोहन- #इति नास्ति।#

ध्वंसका [१०८५] लीनागमनानुकूलकृतिमानित्यन्वयबोधः [१०८६] । एवं 'गोषु धोक्ष्यमाणा [१०८७] स्वागत' इत्यादावपि तादृशप्रतियोगित्वविशेषणप्रागभावस्य समानकालीनत्वं भासते। न च सप्तम्यर्थे समानकालीनत्वे प्रकृत्यर्थस्य[१०८८] गोरन्वयापत्तिः। तादृश[१०८९]दोहनकर्मत्वविशिष्टायाः गोः[१०९०] कर्मत्वविशेषण[१०९१]-दोहनाद्याश्रयत्वसम्बन्धेन कालेऽन्वयात्।

[-२]इदं तु बोध्यम्[२-]। "यस्य च भावेन भावलक्षण"[lxiv]मिति सूत्रस्य यस्य क्रियया क्रियान्तरं लक्ष्यत इति व्याख्यानात् क्रिययोः सामानाधिकरण्ये सप्तमीति[१०९२] सूत्रेणानुशिष्टेति[१०९३] [१०९४] गुणकर्मान्यत्वे सति सत्वादित्यादौ [-३]नामार्थयोः सामानाधिकरण्ये सप्तमी यद्यपि [न] युक्ता। तथापि[३-]

१०८५ Dn2 -लीनगमनानुकूल-
१०८६ Dn1 -वृत्तिमानिति द्वितीयवाक्यार्थः
१०८७ Dn1 दोहनीया-
१०८८ Dn1 -त्वे प्रकृत इत्यर्थस्य
१०८९ Dn2 गो #इत्यधिकम्।#
१०९० Dn1 गोः #इति नास्ति।#
१०९१ Dn1 -स्वविशेषण-
-२ Dn2 इति
२-
१०९२ Dn2 तत्
१०९३ Dn2 इति #इति नास्ति।#
१०९४ Dn2 सा च न युक्ता #इत्यधिकम्।#
-३ Dn2 सा न स्यात्तदापि
३-

गुणकर्मान्यत्वे सति [१०९५] सत्वादित्यभियुक्त [१०९६] प्रयोगदर्शनात् [१०९७] सूत्रात् व्याख्यानयोर्भाव[१०९८] क्रियापदे धर्ममात्र[१०९९]परे।

तथा च यस्य[११००] धर्मेण धर्मान्तरं निरुक्त[११०१]स्वसामानाधिकरण्येन प्रतिपाद्यते, तत्र सप्तमीति सूत्रार्थ [११०२]इत्यदोषः।[११०३]

।।[-४]इति श्रीमन्महामहोपाध्यायजयरामपण्डितविरचितः कारकवादः समाप्तः।। [४-]

---

[i] क्रियया अन्विताः ये विभक्त्यर्थाः तदन्वितत्वम् इत्यर्थः। ग्रामं गच्छतात्यादौ गमनादिक्रियया अन्वितं द्वितीयार्थकर्मत्वादि; तत्र चान्वितः ग्रामादिः प्रकृत्यर्थः कारकमिति समन्वयपद्धतिः।

[ii] 'कर्तृकर्मणोः कृति' (अ.सू.सं २-३-६५) कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्।

१०९५ Dn1 सति #इति नास्ति।#

१०९६ Dn1 -दित्यादौभुक्तयुक्त-

१०९७ Dn1 दर्शना

१०९८ Dn1 व्याख्यातर्योर्भाव

१०९९ Dn2 मात्र #इति नास्ति।#

११०० Dn1 यस्य #इति नास्ति।#

११०१ Dn2 -क्तत्वसमा-

११०२ Dn2 -शेषः

११०३ Dn2 इत्यधिकरणम् #इत्यधिकम्।#

-४ Dn1 इति श्रीन्यायपञ्चाननभट्टाचार्येण विरचितः कारकवादः समाप्तः।।
श्रीमद्गुरुवरराघवेन्द्रतीर्थत्हृदम्भोजसुन्दरानन्दमन्दिराय श्रीनिवासाय नमः।
लिङ्घेरिस्वामिना लिखितमिदं पुस्तकं स्वस्य ।।
४-

iii नामार्थयोः सम्बन्धः न कारकसम्बन्ध इत्यर्थः।

iv क्रियायामन्वितं यत् कर्तृत्वादिसम्बन्धषट्कं, तदन्वयी प्रकृत्यर्थः कारकमिति भावः।

v चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः।।१।। (इति महाभाष्यम्)

vi 'वायुः वृक्षात् पर्णं विभजते'इत्यर्थे 'दोग्धि' इति प्रयोगवारणाय द्रवद्रव्यविभागः दोहनस्य फलमुक्तम्। पर्णं न द्रवद्रव्यमिति नात्र तथाप्रयोगः शक्यापादनः। तथापि 'मेघो गगनात् जलं दोग्धी'ति स्यात् - जलस्य द्रवद्रव्यत्वात्; तद्विभागस्य दोहनफलत्वात्। तद्वारणाय - विशेष इति व्यापारविशेषणम्।।

vii गोवृत्तिः यः क्षीरविभागः, तदनुकूला पयोवृत्ति-निस्सर .क्रिया; तादृशक्रियानुकूलो यः कर्तृगतः व्यापारः तदनुकूलकृतिमान् इत्यर्थः।

viii ग्रामवृत्तिः यः अजासंयोगः, तदनुकूला अजावृत्तिः या क्रिया, तदनुकूलो यः कर्तृव्यापारः, तदनुकूला कृतिः, तद्वान् इत्यर्थः।

ix मुख्यस्य कर्मणः अजायाः पयसश्च कर्मणि प्रयोगे प्रथमान्तनिर्देशः - अजा ग्रामं नीयते, गोः पयो दुह्यत इति। तत्र गौणस्य कर्मणः ग्रामस्य गोश्य न कर्मत्वान्वय इति द्रष्टव्यम्।

x अनभिहिते (अ.सू.सं २-३-१) अधिकारोऽयम्।

xi पचतीत्यत्र आख्यातेन पाकानुकूलः व्यापारः कृतिरूपः, जानातीत्यत्र आश्रयत्वरूपः, नश्यतीत्यत्र प्रतियोगित्वरूपः अर्थः योग्यतया भासत इत्यर्थः।

xii 'चैत्रेण पच्यते' इत्यादिप्रयोगेऽपि 'चैत्रः पचती'ति प्रयोगद्वारैव चैत्रस्य कर्तृत्वं, तत्रैव आख्यातेन कर्तृत्वबोधनात्।

---

xii 'कर्मवत्कर्मणा तुल्यक्रियः' इत्यनुशिष्टं कर्मणोऽपि कर्तृत्वम्। तथा च 'पच्यते ओदनः' इत्यत्र यागाद्यसमभिव्याहृताख्यातबोध्यं कर्तृत्वं नास्ति ओदनस्येति कथं तद्विशेषणं युज्यते? इत्याक्षेपार्थः।

xiii 'कर्मवत्कर्मणा तुल्यक्रियः' इत्यनुशिष्टं कर्मणोऽपि कर्तृत्वम्। तथा च 'पच्यते ओदनः' इत्यत्र यागाद्यसमभिव्याहृताख्यातबोध्यं कर्तृत्वं नास्ति ओदनस्येति कथं तद्विशेषणं युज्यते? इत्याक्षेपार्थः।

---

xiv अत्र मैत्रस्य आख्यातबोध्यव्यापारवत्त्वं नास्ति इति कथं तस्य कर्तृत्वनिर्वाहः? इति आक्षेपार्थः।

xv द्वितीयार्थवृत्तित्वद्वारा धात्वर्थान्वितत्वेनैव तुल्यवित्तिवेद्यत्वात् मैत्रस्य अस्त्येव कर्तृत्वमिति निर्वाहे नास्ति कर्मत्वानापत्तिः, तथा च लक्षणे आख्यातपदं त्याज्यमिति भावः।

xvi कर्तृकरणयोस्तृतीयेति अनभिहिताधिकारीयं सूत्रम्।

xvii स्वतन्त्रः कर्ता (अ.सू.सं १-४-५४) क्रियायां स्वतन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्।

xviii धात्वर्थे विशेषणीभूतं यत्फलं, तच्छालित्वम् इत्यर्थः।

xix भूमिभिन्ने समवेता या क्रिया तज्जन्यं यत् फलं, तच्छालिनीत्यर्थः।

xx भूमिभिन्ने समवेतः यः भूमिवृत्तिसंयोगस्य जनकः स्पन्दः - तदनुकूलकृतिमान् इत्यर्थः।

xxi भूमिवृत्तिः यः संयोगः, तज्जनकं प्रयाणमित्यन्वयः। तत्रैव भूमिनिष्ठेत्यादि विशेषणम्। भूमिनिष्ठः यः अन्योन्याभावः तत्प्रतियोगी भवति कर्ता विहगः, विहगनिष्ठा प्रतियोगिता, तदवच्छेदकः प्रयाणरूपः व्यापारः, तदनुकूलकृतिमानिति भावः।

xxii द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः (अ.सू.सं २-१-२४) द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स तत्पुरुषः।

xxiii कर्तृभिन्ने अन्वयि यत् फलं, तदवच्छिन्नो व्यापारः, तद्बोधकत्वमित्यर्थः। ग्रामं गच्छतीत्यत्र गमनफलं संयोगः। स च कर्तृभिन्ने ग्रामे वर्तते। ततश्च गमिः सकर्मकः।

xxiv गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः। पततयधोधामविसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः।। शिशुपालवधम्, अध्यायः - १, श्लोकः –२

---

xxv अग्नेः संयोगः यः, तदनुकूला या क्रिया, तदनुकूलः घृतादिवृत्तिः नोदनादिः व्यापारः।

xxvi तथा च 'अग्नौ घृतं जुहोति' इत्येव प्रयोगः दृश्यते।।

xxvii विप्रोद्दोश्यकेति त्यागविशषणम्। गोवृत्तिः यः स्वस्वत्वध्वंसः, परस्वत्वं च, तयोः जनकः त्यागः।

xxviii कस्यचिद् वस्तुनः उपेक्षायां, तद्द्वारा परस्वत्वप्रयोजकत्वमस्ति तत्रापि। अतः दाने उपेक्षा वैलक्षण्यसम्पादनाय उपायो मृग्य इति भावः।

xxix तथा चासन्निहितसम्प्रदानकत्यागस्यापि दानत्वं प्रमाणसिद्धमित्यर्थः।।

xxx न्यायवार्त्तिकतात्पर्यटीका।

xxxi कारकान्तरं कर्त्रादिकं, तन्निष्ठव्यापारवत्वसम्बन्धः अत्र जनकत्वेऽवच्छेदकतया विशेषणम्। इत्थं च कुठारस्य छिदादिक्रियाजनकत्वेऽपि स्वक्रियायां समवायिकारणत्वात् तादात्म्येनैव हेतुरिति अन्यकारकवृत्तिव्यापारस्य न जनकतावच्छेदकत्वम्। एवं च तादृशजनकत्वाभावस्तु सुलभ इति ध्येयम्। वस्तुतस्तु छिदादिक्रियायां कर्तृनिष्ठायां स्वव्यापारवत्वसम्बन्धेन जनकत्वेन तदवच्छिन्नजनकत्वसत्वेऽपि कारकान्तरनिष्ठव्यापारवत्वसम्बन्धावच्छिन्नजनकत्वं नास्तीति विवरणमुचितमिति भाति।।

xxxii येनाङ्गविकारः (अ.सू.सं २-३-२०) येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यात्।

xxxiii मुखभिन्नं लोचनत्रयविशिष्टम्।।

xxxiv कर्तृकरणयोस्तृतीया (अ.सू.सं २-३-१८) अनभिहिते कर्तरि करणे च तृतीया स्यात्।

xxxv हेतौ (अ.सू.सं २-३-२३) हेत्वर्थे तृतीया स्यात्।

xxxvi कर्मणा यमभिप्रैति स सम्प्रदानम् (अ.सू.सं १-४-३२) दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्।

xxxvii धात्वर्थतावच्छेदकत्वेन फलं विशेषणीय इत्यर्थः।

---

xxxviii न तथा = धात्वर्थतावच्छेदकं न इत्यर्थः।

xxxix परस्य = संप्रदानान्यस्य; इच्छायाः विषयः गोवृत्तिस्वस्वत्वध्वंसपूर्वकं परस्वत्वम्; तदनुकूला या कृतिः, तद्वान् इत्यर्थः। अत्र विप्रसम्बन्धित्वेनेत्यत्र तृतीयायाः प्रकारत्वमर्थः। इच्छायां तस्यान्वयः। इत्थं च विप्रसम्बन्धित्वप्रकारकगोविषयिणी इच्छाऽत्र ग्राह्या।।

xl पूर्वोक्तधात्वर्थे क्रियापर्यन्तमात्रस्य धात्वर्थत्वे इत्यर्थः द्रष्टव्यः।

xli नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च (अ.सू.सं. २-३-१६) एभिर्योगे चतुर्थी स्यात्।

xlii वृक्षाय उदकं सिञ्चतीत्यत्र उदकजन्यपल्लवादिकं उदकादिकर्मफलम्। शत्रवेऽस्त्रं मुञ्चयतीत्यत्र अस्त्रजन्यं दुःखादिकं कर्मणः फलम्। एवं मित्राय दूतं प्रेषयतीत्यत्र दूतजन्यं वार्ताज्ञानं कर्मणः फलं सर्वमेतत् न क्रियाफलम् इति मन्तव्यम्।।

xliii रुच्यर्थानां प्रीयमाणः (अ.सू.सं १-४-३३) रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः संप्रदानं स्यात्।

xliv धारेरुत्तमर्णः (अ.सू.सं १-४-३५) धारयतेः प्रयोगे उत्तमर्णः उक्तसंज्ञः स्यात्।

xlv वृक्षवृत्तिः यो विभागः तज्जनकं पतनम् इत्यन्वयो द्रष्टव्यः। एवमेव वृक्षवृत्तिः योऽन्योन्याभावः 'वृक्षः पतनवान् न' इति प्रतीतिसाक्षिकः, तत्प्रतियोगी पतनाश्रयः, तन्निष्ठा प्रतियोगिता, तदवच्छेदकं पतनम् इति अन्वयोऽपि ग्राह्यः।

xlvi ध्रुवमपायेऽपादानम् (अ.सू.सं १-४-२४) अपायो विश्लेषः तस्मिन्साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात्।

xlvii धावतोऽश्वस्य निश्चलत्वाभावेऽपि धात्वर्थक्रियाशून्यत्वरूपं निश्चलत्वमव्याहतमिति भावः।

xlviii भीत्रार्थानां भयहेतुः (अ.सू.सं १-४-२५) भयार्थानां त्राणार्थानां च प्रयोगे भयहेतुरपादानं स्यात्।

xlix जनिकर्तुः प्रकृतिः (अ.सू.सं १-४-३०) जायमानस्य हेतुरपादानं स्यात्।

l भुवः प्रभवः (अ.सू.सं १-४-३१)।

li आद्यस्य भूसंम्बन्धस्येत्यर्थः।

lii रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ताद्। वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य।। मेघदूतम्,पूर्वमेघम् -१५।।

liii "श्रीकृष्णः अभिभवाशक्यः" इति ज्ञानाकारः।

liv 'अध्ययनम् अशक्यम्' इति ज्ञानाकारः।

lv अत्र स्वप्रत्यक्षेत्यत्र स्वपदर्थः शिष्यः। उपाध्यायसम्बन्धि यत् प्रत्यक्षं शिष्यविषयकम्, तद्विरोधिव्यापारः अर्थात् तादृशप्रत्यक्षप्रतिबन्धकव्यापारः धात्वर्थः इति बोध्यम्।

lvi तत्पदेनात्र पतनाश्रयः ग्रह्यः। एवं च पतनाश्रयमूर्तभिन्नत्वे सति तादृशमूर्तवस्तुनिष्ठपतनप्रतिबन्धकसंयोगवन्मूर्तत्वम् इत्यर्थः।

अन्यवस्तुवृत्तिपतनप्रतिबन्धकः यः संयोगः तद्वान् यः मूर्तपदार्थः तत्त्वमेव अधिकरणत्वमित्यर्थः। अस्मिन् पक्षे अमूर्तद्रव्याणि न अधिकरणम्।

lvii 'भूतले घट' इति वाक्यात् यादृशो बोधो जायते, तद्विपरीतो बोध 'भूतले न घटः' इत्यस्मात् वाक्यात् उत्पद्यत इत्यविवादम्। नञ् रहिते वाक्यम् येन सम्बन्धेन यस्य धर्मस्य प्रकारतया भानम्। नञ् योगे तेन वाक्येन तेनैव सम्बन्धेन तादृशधर्मस्य अभावः प्रकारतया भासते इति व्युत्पत्तिसिद्धम्। तथा च निरूपकतासम्बन्धस्य प्रकारतावच्छेदकस्य नञ्योगे सति नञर्थाभावप्रतियोगितावच्छेदकत्वनियमात् तदवच्छिन्नाभावस्य बोधो वक्तव्यः। परन्तु निरूपकतासम्बन्धस्य वृत्यनियामकत्वेन अभावीयप्रतियोगितावच्छेदकत्वं नैव स्वीक्रियते। तथा च नायं बोधः समीचीन इति प्राचां मतं परित्यज्य नव्यैः अन्यः पन्थाः समाश्रितः इति भावः।

lviii सीमविषयकस्वत्वप्रकारकेच्छाप्रयोज्यपुष्कलककर्महननानुकूलकृतिमानिति पूर्वोक्तवाक्यसमानाकारको बोधोऽस्मादपि वाक्यात् जायत इति भावः।

lix सा चेत्यत्र तच्छब्दार्थः सप्तमीविभक्तिः।

lx वार्तिकम्।

lxi स्वसमानविषयकज्ञानविषयत्वं तुल्यवित्तिवेद्यत्वम्।। अत्र वित्तिः ज्ञानम्।

---

lxii पुष्यन्ति इत्यत्र धातोः सप्तच्छदीयपुष्पत्वमर्थः। तथा च 'शरदुत्पत्तिकसप्तच्छदीयपुष्पत्वावच्छिन्नाश्रयाः सप्तच्छदाः' इति बोधः।

lxiii वर्तमानः यः गोदोहनध्वंसः, तत्कालीनं यदगमनम्, तदनुकूलकृतिमान् इत्यर्थः।

lxiv यस्य च भावेन भावलक्षणम् (अ.सू.सं २-३-३७) यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्।

KARAKAVADA

of

Jayarama Nyayapanchanana

"Karakavada" is one of the famous works authored by Sri Jayarama Nyayapanchanana - a well known Nyaya Philosopher from Navadvipa lived in 17th CE. He was disciple of Sri Ramabhadra Sarvabhouma - the grandson of Sri Jagadisha Tarkalankara. The present work was not so far available in edited form. This edition is brought out by Dr. Shrinivasa Varakhedi, with the help of his research associate Miss. Shivaja collecting the text from five manuscripts available in different parts of the country. At the end short notes are also added to the original text in places to be difficult to understand.

Dr. Shrinivasa Varakhedi is currently working as a faculty member in Shabdabodha Dept. in Rashtriya Sanskrit Vidyapeetha, Deemed University, Tirupati. He has many research papers and books in his credit. Recently he has been honoured by the Presidential award - 2007.